The location of these centres are not clear, nor are they uniformly given in the texts. Most of them however are located in the region of forehead (lalāṭa-deśe), according to *Saṁmohana-tantra,* which text includes ardhachandra (11) in Bindu or Chandra-maṇḍala (10), and Śakti (15) and Vyāpikā (16) in mahā-nāda (14). Another text locates unmanī centre at the aperture on top of the crown of the head (brahma-randhre) and identifies it with mahā-bindu (19), which is below the sahasrāra centre (akula-padma).

THE CHAKRAS

(The following is extracted from *Svachchhanda-tantra.* It gives an account of the gross as well as the subtle chakras)

(१) THE SIX STHŪLA-CHAKRAS

अधश्चौर्ध्वं सुषुम्णायाः सहस्रदलसंयुतम्।
ऊर्ध्वाधोमुखमीशानि कर्णिकाकेसरान्वितम्॥१॥

तयोर्मध्ये सुषुम्णान्तस्त्रिशदाधारपङ्कजम्।
गुदमेढ्रान्तरं देवि पञ्चाङ्गुलसमुच्छ्रितम्॥२॥

कन्दमेकाङ्गुलं मध्ये द्वयाङ्गुलविसारणम्।
तस्य मध्ये महायोनिस्त्रिकोणाकाररूपिणी॥३॥

सुषुम्णा योनिमध्यस्था तस्या मूले महेश्वरि।
अधः पद्मं सहस्रारं कर्णिकाकेसरान्वितम्॥४॥

कर्णिकामध्यतो देवि कुलदेवी च संस्थिता।
तत्पद्मोर्ध्वं सुषुम्णाया मध्ये त्वेकाङ्गुलोपरि॥५॥

पद्ममष्टदलैर्युक्तमष्टग्रन्थिसमन्वितम्।
तन्मध्ये कुलदेवीं च संस्मरेत्साधकोत्तमः॥६॥

एकाङ्गुलप्रमाणोर्ध्वं षड्दलं कुलपङ्कजम्।
आधारपङ्कजं पीतं चतुष्पत्रं सुकेसरम्॥७॥

अधोमुखं च तन्मध्ये कुण्डली परमेश्वरी।
स्वयम्भुमध्यगा चिन्त्या वरदादिभिरावृता॥८॥

तदूर्ध्वं कर्णिकामध्ये वह्निबिम्बं तदूर्ध्वगम्।
पूर्णपीठं च तन्मध्ये साकिनी संस्थिता शिवे॥९॥

एतस्माद् द्वयंगुलादूर्ध्वं स्वाधिष्ठानं षडस्रकम्।
काकिनीं चिन्तयेद्देवीं बन्दिन्यादिभिरावृतम्॥१०॥

ततस्तु मणिपूरं च दशपत्रं सुशोभनम्।
लाकिनी मध्यगं तच्च डामर्यादिभिरावृतम्॥११॥

पङ्कजं राकिनीमध्यं द्वादशारमनाहतम्।
तस्मादेकाङ्गुलादूर्ध्वं विशुद्धं षोडशारकम्॥१२॥

मध्यगा डाकिनी देवी अमृताद्यादिभिरन्विता।
आज्ञाधारं द्विपत्राब्जं हक्ष द्विदलसंयुतम्॥१३॥

हंसवती क्षमा पार्श्वं तयोर्मध्ये तु हाकिनी।
बिन्द्वादिनवकं चिन्त्यं ललाटादूर्ध्वगं शिवे॥१४॥

(२) THE SŪKSHMA-CHAKRAS

सूर्यकोटिप्रतीकाशं चन्द्रकोटिसमप्रभम्।
मध्ये फालं करं ध्वान्तं बिन्द्वादिनवकं भजे॥१५॥

अर्धचन्द्रस्तदूर्ध्वं तु रोधिनी तस्य चोपरि।
द्वारं तु मोक्षमार्गस्य नादस्तदूर्ध्वसंस्थितः॥१६॥

नाड्याधारस्तु नादान्तो भित्त्वा सर्वमिदं जगत्।
शक्तिं वन्दे तदूर्ध्वं तु ध्यानान्मुक्तिफलप्रदाम्॥१७॥

सूक्ष्मां वन्दे सुसूक्ष्मां तदूर्ध्वं व्यापिकां स्थिताम्।
चिदानन्दस्वरूपां तु परां शक्तिं तदूर्ध्वतः॥१८॥

समनां तां भजे शक्तिं सर्वकारणकारणाम्।
तां शक्तिं कारणत्वेन निर्विकल्पां निरञ्जनाम्।
मनः संक्रमते यत्र तेन तामुन्मनां भजे ॥१९॥

(३) THE NINE SŪKSHMA-CHAKRAS

1. Bindu

ललाटमध्यदेशस्थः सर्ववाच्याभिन्नः प्रकाशात्मा
वृत्ताकारोऽव्यक्तध्वन्यवस्थाविशेषरूपो नादीभवद्बिन्दुः॥

2. Ardha-Chandra

तदूर्ध्वं किञ्चिद्वाच्यप्राधान्यं शान्तावर्धचन्द्राकारोऽर्धचन्द्रः॥

3. Rodhinī

तस्य चोपरि ततोऽस्ति वेद्यकौटिल्यविगमे स्पष्टत्रिकोणाकारा
अतद्बुद्धेस्तु रोधनाद्रोधिनी॥

4. Nāda

मधुरास्फुरःसर्वशब्दसाधारणाऽव्यक्तध्वन्यात्मा
तिर्यग् बिन्दु-द्वयान्तरस्थरेखाकारो नादः॥
(अर्धचन्द्रादि नादपर्यन्ता तुरीयावस्था।)

5. Nādānta

तत्र नादस्यैव शब्दव्याप्तेःशमने सुसूक्ष्मध्वन्यात्मा स
व्यस्तबिन्दुयुक्त हलाकारो नादान्तः॥

6. Śakti

प्रशान्तौ तु ह्लादात्मा स्पर्शव्याप्त्युन्मेषरूपा वामस्थबिन्दूद्यद्रेखाकारा शक्तिः॥

7. Vyāpikā

तदूर्ध्वं देहानवच्छेदाद् व्योमव्याप्त्या नादाद्व्यापिनी
बिन्दुविलसत् त्रिकोणाकारा व्यापिका॥

8. Samanā

तदूर्ध्वं तु समस्तभावाभावभेदशान्तौ मनन्नात्मकमन्त्रकरणबोधात्मिका ऊर्ध्वाधो
बिन्दुद्वयान्तरालस्थऋजुरेखाकारा समना॥

9. Unmanī

मनः संक्रमते यत्र बिन्दुविलसदृजुरेखाकारानिर्विकल्पा निरञ्जना
निस्तरङ्गमहोदधिकल्पावस्थाना उन्मनी॥

KUṆḌALINĪ

सच्चिदानन्दविभवात्सकलात्परमेश्वरात्।
परशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते तथा॥१॥

बिन्दूर्नादो बीजमिति तस्य भेदाः समीरिताः।
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः॥२॥

शब्दब्रह्मेति शब्दार्थं शब्दमित्यपरे जगुः।
चैतन्यं सर्वभूतानां शब्दब्रह्मेति कथ्यते॥३॥

तत्प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम्।
वर्णात्मनाऽऽविर्भवति पञ्चाशद्वर्णभेदतः॥४॥

देहस्य मध्यमं स्थानं मूलाधारमिति कथ्यते।
गुदात्तु द्व्यङ्गुलादूर्ध्वं लिङ्गात्तु द्व्याङ्गुलादधः॥५॥

आधारकन्दमध्यस्थं त्रिकोणमतिसुन्दरम्।
तत्र विद्युल्लताकारा कुण्डलिनी परदेवता॥६॥

प्राणाग्नि बिन्दुनादानां सवित्री सा सरस्वती।
मूलाधाराग्रकोणस्था सुषुम्णा ब्रह्मरन्ध्रगा॥७॥

मूलेऽर्धच्छिन्नवंशाभा षडाधारसमन्विता।
तत्पार्श्वकोणयोर्जाते द्वे इडापिङ्गले स्थिते॥८॥

बिभर्ति कुण्डलीशक्तिरात्मानं हंसमाश्रिता।
हंसः प्राणाश्रयो नित्यं प्राणो नाडीसमाश्रयः॥९॥

नाडीचक्रमिति प्राहुस्तस्मान्नाड्यः समुद्गताः।
देहं व्याप्य नाडीभिः प्रयाणं कुरुते बहिः॥१०॥

पराशक्तिः कुण्डलिनीसंज्ञिता आत्मतेजसा दीप्ता सती प्राणादीनां प्रसवित्री मूलाधारत्रिकोणस्था मूलप्रकृतिः। प्राणो देहान्तः सञ्चार-वायुविशेषः। अग्निः कोष्ठगतोष्मारूपोऽन्नरसादीनां पाचकः। एतौ प्राणाग्नी अग्नीषोमौ चन्द्रसूर्याविति योगशास्त्रे प्रसिद्धौ। तत्र प्राणश्चन्द्रमाः सोम इति चोच्यते। एतौ चेडापिङ्गलयोर्देवते॥ बिन्दुव्यक्तरूपौ ध्वन्यवस्थाविशेषः। नादस्तु सर्ववर्णसाधारणः। एतयोः प्रसवः सञ्चाराः। तत्कर्त्री पराशक्तिः कुण्डलिनीत्यर्थः। सा प्राणघोषावस्थां प्राप्यं वर्णात्मनाऽभिव्यज्यमाना सरस्वतीत्युच्यते। मूलाधाराग्रकोणे स्थिता अभिव्यज्यास्थिता जाता सुषुम्णाख्या नाडी ब्रह्मरन्ध्रगता। योगिगम्या अर्धच्छिन्नवंशवदवभासमाना षड्भिराधारैः समन्विता मूलाद्याज्ञाख्यैराधारैः क्रमेण चतुर्दशादि द्विदलान्तकमलैर्मूलाधारादि षट्चक्रगतैः समन्विता। मूलाधारस्य त्रिकोणस्य वामकोणे इडा दक्षिणकोणे पिङ्गला जाता। तस्मान्नाड्यो विभक्ता जायन्ते। तदेव नाडीचक्रमाहुः॥

The concept of antaryāga is mainly concerned with visualizations of identity (aikya-bhāvanā). Besides the four (or six) types of identity already mentioned, there is another group of facotrs for which identity has to be visualized.

पिण्डब्रह्माण्डयोरैक्यं लिङ्गसूत्रात्मनोरपि।
स्वापाव्याकृतयोरैक्यं क्षेत्रज्ञपरमात्मनोः॥

(1) identity between the human body (piṇḍa) and the cosmos (brahmāṇḍa); (2) identity between liṅga or the vital constitution of man (liṅgātmā, liṅga-śarīra, consisting of sixteen factors, viz. the ten indriyas, five of congnition and five of action; mind; and the five tanmātras or pure elements) and sūtrātmā (the vital current defined by cosmos, the spirit that leads the liṅga-śarīra through the archirādi path after the death of man); (3) between svāpa or deep sleep (sushupti or prājñā) and avyākṛta (the undifferentiated and unevolved Brahman under the influence of avidyā); and kshetrajña (the individual soul) and paramātmā (the supreme soul or Brahman).

The most popular text employed for the visualization of all these aspects of identity by the Samayins is *Bhāvanoplanishat,* which is held in high regard as the principal Devyupanishat. It has an excellent commentary by Bhāskara-rāya-makhin, a prolific writer on Śrī-vidyā.

This upanishad which is formally affilliated to Atharva-veda deals with the details of anataryāga, also called samhāra-yāga as it prescribes gradual dissolution of mind in intense contemplation. It is said that heart-felt eulogy of the Divine (stotra) is better than external worship (pūjā, that recitation of the sacred formula (japa) is better than worship, that meditation (dhyāna) is better than recitation, and that best of all is dissolution of mind (laya).

पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः।
जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः॥

It seeks to establish perfect identity between the human constitution as Śri-chakra in all details, and to prescribe the method by which all the sequences of external worship may be adapted in antaryāga by visualizations and contemplations. The text works out the identity on the basis of the tāntrik outlook but in conformity with the Vedic tradition.

The text finally promises that by such visualizations and contemplations even for three moments on the esoteric significance of Śrī-chakra and on the involvement of the details of Śrī-chakra iṇ ones own daily life, (called here bhāvanā), one achieves absolute identity between himself and the Godhead; and the text further holds out, in accordance with the tāntrik outlook, that whatever one thinks of will easily be accomplished, without his exertion.

एव मुहूर्तत्रयं भावनया युक्तो भवति तस्य
देवतात्मैक्यसिद्धिः। चिन्तितकार्याणि अयत्नेन
सिद्ध्यन्ति। स एव शिवयोगीति कथ्यते॥
इत्युपनिषत्॥

This is what in tantra is known as the 'short path', the longer path being filled with rituals and being dependent upon the avialability of material articles and implements. However, it is not suitable for all people, it is indicated only for the evolved souls, who have also advanced in the tāntrik

practice. And the help of the guru is indispensable in this path. That is why the upanishad begins with the statement that the guru is the supreme causal power:

॥ श्रीगुरुः परमकारणभूता शक्तिः ॥

For the practitioner must visualize here not only the common object and familiar services, but also abstract entities and esoteric rites. An illustration would be the sequence of 'upachāras' in mānasa-pūjā (internal worship) where the five primary elements that constitute the entire universe are themselves offered as so many services.

लं पृथिव्यात्मिकायै बालात्रिपुरसुन्दर्यै गन्धं कल्पयामि।
हं आकाशात्मकं पुष्पं कल्पयामि।
यं वाय्वात्मकं धूपं कल्पयामि।
रं तेज आत्मकं दीपं कल्पयामि।
वं अमृतात्मकं नैवेद्यं कल्पयामि।

The five elements are visualized by their seed-syllables and represented on the fingers of the right hand. Earth is symbolically offered as sandal-paste, water as food-offerings, fire as light, air as incence, and ākāśa as flower. And while offering these services, the devotee only thinks of them; the offerings are all made mentally.

Vāmakeśvara-tantra (Kāma-kalpa-taru-stava, 50) suggests that the entire Śri-chakra in all its details may be worshipped only by eulogies and thoughts, and affirms that this procedure is as effective as the worship by

external rites. But this is only for the fortunate ones who are eligible for it:

संपूज्य केऽपि सकलार्थबलोपचारै -
ग्रंन्थिं विभिद्य परमेष्ठिनमुद्वहन्ति।
बीजात्मिकां वदनधामनिधिस्वरूपाम्
जिह्वाग्रतः सुकृतिनः परिचिन्तयन्ति॥

This suggestion has been taken up by many poetic works which are in the nature of stotras, where the goddess and her residence (Śrī-chakra) are visualized in great detail. Merely reciting them would, it is believed, merit the rewards that ensue elaborate external worship (which is expensive and which requires preparation, effort and arrangement). *Tripura-sundarī-mānasa-pūjā-stotra* (123), for instance, recommends the 'pañchopachāra-pūjā' mentioned above (the offering of the five primary elements), for those who are unable to undertake external worship, for lack of knowledge and convenience.

अर्चन विधौ ज्ञानलवोपि दूरे
दूरे तदापादकवस्तुजातम्।
प्रदक्षिणीकृत्य ततोऽर्चनं ते
पञ्चोपचारात्मकमर्पयामि॥

The sequences of external worship are visualized here and described, so that one may recite these verses whenever he can, and attract the grace of the goddess (127):

नित्यार्चनमिदं चित्ते भाव्यमानं सदा मयि।
निबद्धं विविधैः पद्यैरनुगृह्णातु सुन्दरी॥

Indeed, this device is intended to help those who are devoid of the strength of devotion, of the facility of renunciation, and of the inclination for contemplation. Recitation of these verses would serve as offerings of flowers.

मम न भजनशक्तिः पादयोस्ते न भक्ति -
र्न च विषयविरक्तिर्ध्यानयोगे न सक्तिः।
इति मनसि सदाहं चिन्तयन्नाद्यशक्ते
रुचिरवचनपुष्पैरर्चनं सञ्चिनोमि॥

Another work of similar nature, Devī-chatus-shashṭyupachāra-pūjā-stotra, enumerates and describes as many as sixty-four services during worship, but declares that reading of this work alone would be as good as going through these services in actuality (71):

पूजामिमां पठेन्नित्यं पूजां कर्तुमनीश्वरः।
पूजाफलमवाप्नोति वाञ्छितार्थं च विन्दति॥

It may be recalled that antaryāga is also prescribed in the Vedic tradition in terms of 'ātma-yajña' and 'purusha-medha' in the Nārāyaṇa-praśna section of *Taittirīya-brāhmaṇa,* we have an elaborate account of sacrifice drawing out correspondances between the factors and faculties of the human constitution with the details of the sacrificial rite.

तस्यैवं विदुषो यज्ञस्यात्मा यजमानः,
श्रद्धा पत्नी, शरीरमिध्मं, उरो वेदिः, लोमानि बर्हिः,
वेदःशिखा, हृदयं यूपः, काम आज्यं, मन्युः, पशुः

तपोऽग्निः, दमःशमयुता दक्षिणा, वाक् होता, प्राण
उद्गाता, चक्षुरध्वर्युः, मनो ब्रह्मा, श्रोत्रमग्नीत्॥

In this yajña, ones own self is the performer of the sacrifice (yajamāna), faith is his wife, who also must take part in the rite; the body itself is the fuel that lits the fire (idhma); the chest of the individual is the altar (vedī), the bodily hair are the darbha-grass (barhi); the tuft of hair on the head is the hymnology recited (veda); the heart is the sacrificial post (yūpa); desires are the clarified butter that is poured into the fire as oblation (ājya); anger and ill-will are the beasts that are tied to the post and killed as offering (paśu); penance is the fire (agni); control of mind and restraint of sense-functions are the fees that are offered to the priests (dakshiṇā); speech is one of the four priests, hotṛ; vital current is another of the priest, udgātṛ; vision is the third priest, adhvaryu; mind is the fourth priest, brahmā; and ears are the attendant-priest, agnīdhra.

The āgamas have continued this symbolism and have prescribed in addition to the detailed and formal worship of the icon, worship which is purely internal, haveing ones own self as the god:

हृत्पद्मासनं दद्यात् सहस्रारच्युतामृतैः।
पाद्यं चरणयोर्दद्यान्मनसाऽर्घ्यं निवेदयेत्॥१॥

तेनामृतेनाचमनं स्नानीयमपि कल्पयेत्।
आकाशतत्त्वं वसनं गन्धं तु गन्धतत्त्वकम्॥२॥

चित्तं प्रकल्पयेत् पुष्पं धूपं प्राणान्प्रकल्पयेत्।
तेजस्तत्त्वं च दीपार्थं नैवेद्यं च सुधाम्बुधिम्॥३॥

अनाहतध्वनिं घण्टां वायुतत्त्वं च चामरम्।
नृत्यमिन्द्रियकर्माणि चाञ्चल्यं मनस्तथा॥४॥

पुष्पं नानाविधं दद्यादात्मनो भावसिद्धये।
अमायामनहंकारमरागममदं तथा॥५॥

अमोहमदम्भं चाद्वेषाक्षोभकं तथा।
अमात्सर्यमलोभं च दशपुष्पं प्रकीर्तितम्॥६॥

अहिंसा परमं पुष्पमिन्द्रियनिग्रहम्।
दयाक्षमाज्ञानपुष्पं पञ्चपुष्पं ततः परम्
इति पञ्चदशैर्पुष्पैर्भावपुष्पैः प्रपूजयेत्॥७॥

Godhead must be provided with a seat in ones own heart-lotus. The nectar that oozes out of the thousand-petalled lotus on the crown of ones head must be offered as water for the feest of the God; mind itself must serve as water for washing the hands of the Deity; nectar from the thousand-petalled lotus again must be offered as water for ceremonial sipping and for purificatory bath. The element of ākāśa in ones own body must serve as the garments offered to the Deity after bath, and the earth element as sandal-paste, ones internal organ must be offered as flower, ones own vital currents as incense. The fire element serves as the light for the deity, and nectar from the thousand-petalled lotus as the food-offering.

The sound arising from the anāhata-centre (in the heart) will be the ringing of the bell, and the air element the waving of the fan in front of the deity. The sense-functions and the mental processes serve as dance-postures presented for the entertainment of the deity.

Ten kinds of flowers are offered to the deity: non-deceit, selflessness, desirelessness, non-arrogance, non-confusion, absence of haughtiness, absence of hate, absence of jealousy and lack of greed. These are the ten flowers.

Further, non-violence, self-restraint, compassion, forgiveness and wisdom are five more flowers that are placed at the feet of the deity.

ओं

भद्रंकर्णेभिरितिशान्तिः

श्रीः

भावनोपनिषत् प्रयोगविधिसमेता

1. श्रीगुरुस्सर्वकारणभूता शक्तिः॥
2. तेन नवरन्ध्ररूपो देहः॥
3. नवचक्ररूपं श्रीचक्रम्॥
4. वाराहीपितृरूपा कुरुकुल्लाबलिदेवता माता॥
5. पुरुषार्थास्सागराः॥
6. देहो नवरत्नद्वीपः॥
7. त्वगादिसप्तधातुरोमसंयुक्तः ॥
8. संकल्पाः कल्पतरवः तेजः कल्पकोद्यानम्॥
9. रसनया भाव्यमाना मधुराम्लतिक्तकटुकषाय लवणरसाः षड्तवः॥
10. ज्ञानमर्घ्यं ज्ञेयं हविःज्ञाता होता ज्ञातृज्ञान ज्ञेयानामभेदभावनं श्रीचक्रपूजनम्॥
11. नियति शृङ्गारादयो रसा, अणिमादिसिद्धयः काम-क्रोधलोभमोहमदमात्सर्यपुण्यपापमया ब्राह्म्याद्यष्टशक्तयः ॥
12. आधारनवकं मुद्राशक्तयः॥
13. पृथिव्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपाद-पायूपस्थानि मनोविकाराः कामाकर्षिण्यादि षोडशशक्तयः॥

14. वचनादानगमनविसर्गानन्दहानोपादानोपेक्षाख्य बुद्‌ध्योऽनङ्गकुसुमाद्यष्टौ ।।

15. अलंबुसाकुहूर्विश्वोदरावारुणीहस्तिजिह्वायशोवती पयस्विनीगान्धारीपूषाशंखिनीसरस्वतीइडापिंगलासुषुम्ना चेति चतुर्दशनाड्यः सर्वसंक्षोभिण्यादि चतुर्दश शक्तयः

16. प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्त धनञ्जया दशवायवस्सर्वासिद्धिप्रदादि बहिर्दशारदेवताः ।।

17. एतद्वायुसंसर्गकोपाधिभेदेन रेचकः पाचकश्शोषको दाहकः प्लावक इति प्राणमुख्यत्वेन पञ्चधा जठराग्निर्भवति

18. क्षारक उद्गारकः क्षोभको जृम्भको मोहकः इति नागप्राधान्येन पञ्चविधाः ते मनुष्याणां देहगाः भक्ष्यभोज्य चोष्यलेह्यपेयात्मकपञ्चविधमन्नं पाचयन्ति ।।

19. एता दशवह्निकलास्सर्वज्ञाद्या अन्तर्दशारगा देवताः ।।

20. शीतोष्णसुखदुःखेच्छास्सत्वंरजस्तमोवशिन्यादि शक्तयोष्टौ ।।

21. शब्दादितन्मात्राः पञ्चपुष्पबाणाः ।।

22. मन इक्षुधनुः ।।

23. रागः पाशः ।।

24. द्वेषोंऽकुशः ।।

25. अव्यक्तमहदहङ्काराःकामेश्वरीवज्रेश्वरीभगमालिन्योऽन्तस्त्रिकोणगा देवताः ।।

26. निरुपाधिकसंविदेव कामेश्वरः ॥

27. सदानन्दपूर्णः स्वात्मैव परदेवता ललिता ॥

28. लौहित्यमेतस्य सर्वस्य विमर्शः ॥

29. अनन्थ चिन्तत्वेन च सिद्धिः ॥

30. भावनायाः क्रियोपचारः ॥

31. अहं त्वमस्ति, नास्ति कर्तव्यमकर्तव्यमुपासितव्य मित्यादि विकल्पानां आत्मनि विलापनं होमः ॥

32. भावनाविषयाणामभेदभावनंतर्पणम् ॥

33. पञ्चदशतिथिरूपेण कालस्य परिणामावलोकनम् ॥

34. एवं मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा भावना-परो जीवन्मुक्तो भवति। स एव शिवयोगीति गद्यते ॥

35. कादिमतेनान्तश्चक्रभावनाः प्रतिपादिताः ॥

36. य एवं वेद सोऽथर्वशिरोधीते ॥

॥ इति भावनोपनिषत् ॥

प्रयोगविधिः ॥

(The numbers refer to the sūtras)

(१)

अथ भावनोपनिषदा मुक्त्यै या भावनाः कथिताः।
भास्कररायो रचयति तासामेवं प्रयोगविधिम्॥
मूलेन प्राणानायम्य ऋष्यादिन्यासत्रयं कृत्वा
विवेकवृत्यवच्छिन्नचिच्छक्तिरूपसुषुम्नात्मने श्रीगुरवे नमः॥

(इति ब्रह्मरन्ध्रं स्पृष्ट्वा)

(२)

(दिव्यौघः)

दक्षश्रोत्ररूपपयस्विन्यात्मने प्रकाशानन्दनाथाय नमः॥
वामश्रोत्ररूपशङ्किन्यात्मने विमर्शानन्दनाथाय नमः॥
जिह्वारूपसरस्वत्यात्मने अनन्तानन्दनाथाय नमः॥

(सिद्धौघः)

दक्षनेत्ररूप पूषात्मने अनन्तानन्दनाथाय नमः॥

(नाड्यः)

वामनेत्ररूपगान्धार्यात्मने श्रीसत्यानन्दनाथाय नमः॥
ध्वजरूपकुह्वात्मने श्रीपूर्णानन्दनाथाय नमः॥

(३)

(मानवौघः)

दक्षनासारूपपिंगलात्मने स्वभावानन्दनाथाय नमः॥
वामनासारूपेडात्मने प्रतिभानन्दनाथाय नमः॥
पायुरूपालम्बुसात्मने सहजानन्दनाथाय नमः॥

(इति तत्तत्स्थानानि संस्पृश्य)

(४)

नवचक्ररूप श्री चक्रात्मेन देहाय नमः।
पितृरूपास्थ्याद्यवयवात्मने वाराह्यै नमः।
मातृरूपमांसाद्यवयवात्मने बलिदेवतायै कुरुकुल्लायै नमः।

(इति त्रिर्व्यापकं कृत्वा)

(५)

देहपश्चाद्भागरूपधर्मात्मने इक्षुसागराय नमः॥
देहदक्षिणभागरूपार्थात्मने सुरासागराय नमः॥
देहप्राग्भागरूपकामात्मने घृतसागराय नमः॥
देहोदग्भागरूप मोक्षात्मने क्षीरसागराय नमः॥

(६)

(देहात्मने नवरत्नद्वीपाय नमः इति त्रिर्व्यापकं कृत्वा)

(७)

१. मांसात्मने पुष्परागरत्नद्वीपाय नमः
२. रोमात्मने नीलरत्नद्वीपाय नमः
३. त्वगात्मने वैडूर्यरत्नद्वीपाय नमः
४. रुधिरात्मने विद्रुमरत्नद्वीपाय नमः
५. शुक्रात्मने मौक्तिकरत्नद्वीपाय नमः
६. मज्जात्मने मरकतरत्नद्वीपाय नमः
७. अस्थ्यात्मने वज्ररत्नद्वीपाय नमः
८. मेद आत्मने गोमेदकरत्नद्वीपायनमः
९. ओज आत्मने पद्मरागरत्नद्वीपाय नमः

१. मांसाधिदेवतायै कालचक्रेश्वैय नमः
२. रोमाधिदेवतायै रुद्रचक्रेश्वर्यै नमः
३. त्वगधिदेवतायै मातृचक्रेश्वर्यै नमः

४. रुधिराधिदेवतायै रत्नचक्रेश्वर्यै नमः
५. शुक्राधिदेवतायै दशाचक्रेश्वर्यै नमः
६. मज्जाधिदेवतायै गुरुचक्रेश्वर्यै नमः
७. अस्थ्याधिदेवतायै तत्वचक्रेश्वर्यै नमः
८. मदोधिदेवतायै ग्रहचक्रेश्वर्यै नमः
९. ओजोधिदेवतायै मूर्तिचक्रेश्वर्यै नमः

(८)

सङ्कल्पात्मभ्यः कल्पतरुभ्यो नमः॥
तेज आत्मने कल्पकोद्यानाय नमः॥

(९)

मधुररसात्मने वसन्तर्तवे नमः।
अम्लरसात्मने ग्रीष्मर्तवे नमः॥
तिक्तरसात्मने वर्षर्तवे नमः।
कटुरसात्मने शरदृतेव नमः॥
कषायरसात्मने हेमन्तर्तवे नमः।
लवणरसात्मने शिशिरर्तवे नमः॥
इन्द्रियात्मभ्योऽश्वभ्यो नमः।
इन्द्रियार्थात्मभ्यो गजभ्यो नमः॥
करुणात्मिकायै तोयपरिखायै नमः।
ओजः पुञ्जात्मने माणिक्यमण्टपाय नमः॥

(१०)

ज्ञानात्मने विशेषार्घ्याय नमः।
ज्ञेयात्मने हविषे नमः॥
ज्ञात्रात्मने होत्रे नमः।

चिदात्मने श्रीमहात्रिपुरसुन्दर्यै नमः॥

इति तत्तदनुसन्धानपूर्वकं मनसा नत्वा ज्ञातृज्ञानज्ञेयानां नामरूपविलापनानुसन्धानेन चिन्मात्ररूपताविर्भावनेन क्षणं विश्रम्य॥

पञ्चदश नित्या यजेत्। हृदि हस्तं निधाय।

१. त्रिपुरा २. त्रिपुपरेशी ३. त्रिपुरसुन्दरी ४. त्रिपुरवासिनी ५. त्रिपुराश्रीः
६. त्रिपुरमालिनी ७. त्रिपुरासिद्धा ८. त्रिपुराम्बा
९. महात्रिपुरसुन्दरी इति मतान्तरे चक्रेश्वरीनवकमाम्नातम्॥

चत्वारिंशदधिक चुतुर्दशशतश्वासात्मने प्रतिपत्तिथिरूपकामेश्वरीनित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने द्वितीयातिथिरूपभगमालिनी नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने तृतीयातिथिरूपनित्याक्लिन्ना नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने चतुर्थीतिथिरूपनित्यक्लिन्ना नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने पञ्चमीतिथिरूपवह्निवासिनी नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने षष्ठीतिथिरूपमहावज्रेश्वरी नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने सप्तमीतिथिरूप शिवदूती नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने अष्टमीतिथिरूप त्वरिता नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने नवमीतिथिरूप कुलसुन्दरी नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने दशमीतिथिरूप नित्या नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने एकादशीतिथिरूप नीलपताका नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने द्वादशीतिथिरूप विजया नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने त्रयोदशीतिथिरूप सर्वमंगला नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने चतुर्दशीतिथिरूप ज्वालामालिनी नित्यायै नमः॥
तदुत्तरचत्वारिंशदधिक चतुर्दशशतश्वासात्मने पौर्णमासीतिथिरूप चित्रा नित्यायै नमः॥
(नित्यामन्त्रानपि तत्तदादौ केचित्पठन्ति इयं नित्याभावना सर्वान्त एव वा कार्या॥)

(११)

चतुरश्राद्यरेखायै नम इति वक्ष्यमाणस्थानेषु व्यापकं न्यस्य॥

दक्षासंपृष्ठरूपशान्तरसात्मने अणिमासिध्यै नमः
दक्षपाण्यंगुल्यग्ररूपाद्भुतरसात्मने लघिमासिध्यै नमः
दक्षस्फिग्रूप करुणरसात्मने महिमा सिध्यै नमः
वामपादांगुल्यग्ररूप हास्यरसात्मने वशित्व सिध्यै नमः
वामस्फिग्रूपबीभत्सरसात्मने प्राकाम्य सिध्यै नमः
वामपाण्यंगुल्यग्ररूप रौद्ररसात्मने भुक्ति सिध्यै नमः
वामांसपृष्ठरूप भयानकरसात्मने इच्छा सिध्यै नमः
चूलीमूलरूपं श्रृंगाररसात्मने प्राप्ति सिध्यै नमः
चूलीपृष्ठरूप नियत्यात्मने सर्वकाम सिध्यै नमः

(१२)

(चतुरश्रमध्यरेखायै नम इति तदन्तर्व्यापकं न्यस्य)
पादांगुष्ठद्वयरूप कामात्मने ब्राह्म्यै नमः
दक्षपार्श्वरूप क्रोधात्मने माहेश्वर्यै नमः
मूर्धरूप लोभात्मने कौमार्यै नमः
वामपार्श्वरूपमोहात्मने वैष्णव्यै नमः
वामजानुरूपमदात्मने वाराह्यै नमः
दक्षजानुरूपमात्सर्यात्मने इन्द्राण्यै नमः
दक्षबहिरंसरूपपुण्यात्मने चामुण्डायै नमः
वामबहिरंसरूपपापात्मने महालक्ष्म्यै नमः
चतुरश्रान्त्यरेखायै नम

इति तदन्तर्व्यापकं न्यस्य

पादांगुष्ठद्वयरूपाधस्सहस्र दळकमलात्मने सर्वसंक्षोभिणीमुद्रायै नमः
दक्षपार्श्वरूपमूलाधारात्मने सर्वाविद्राविणीमुद्राशक्त्यै नमः
मूर्धरूपस्वाधिष्ठानात्मने सर्वाकर्षिणी मुद्राशक्त्यै नमः
वामपार्श्वरूपमणिपूरात्मने सर्ववशङ्करी मुद्राशक्त्यै नमः
वामजानुरूपानाहतात्मने सर्वोन्मादिनी मुद्राशक्त्यै नमः
दक्षजानुरूप विशुध्यात्मने सर्वमहाङ्कुशा मुद्राशक्त्यै नमः
दक्षोरुरूपेन्द्रयोन्यात्मने सर्वखेचरी मुद्राशक्त्यै नमः
वामोरुरूपाज्ञात्मने सर्वबीज मुद्राशक्त्यै नमः
द्वादशान्तरूपोर्ध्वसहस्रदलकमलात्मने सर्वयोनि मुद्रायै नमः
पादांगुष्ठरूपाधारनवकात्मने सर्वत्रिखण्डा मुद्रायै नमः
हृद्रूपत्रैलोक्यमोहनचक्रेश्वर्यैत्रिपुरायै नमः

इति तत्तस्थानानि स्पृष्ट्वा ॥

एतांस्सर्वास्स्वात्माभिन्नत्वेन विभाव्य आत्मनः अपरिच्छिन्नत्वं भावयेत्॥
प्रकटयोगिनीरूपस्वात्मने अणिमासिध्यै नमः॥
अपरिच्छिन्नस्वात्मात्मने सर्वक्षोभिणीमुद्रायै नमः

इति प्रयोगपूर्वकं वा विभावयेत्॥

(१३)

षोडशदळपद्माय नम इति तदन्तर्व्यापकं न्यस्य
दक्षश्रोत्रपृष्ठरूप पृथिव्यात्मने कामाकर्षिणीनित्याकळायै नमः
दक्षांसरूपात्मने बुध्याकर्षिणांनित्याकलायै नमः
दक्षकूर्पररूपतेज आत्मने अहंकाराकर्षिणीनित्याकलायै नमः
दक्षकरपृष्ठरूपवाय्वात्मने शब्दाकर्षिणी नित्याकलायै नमः
दक्षोररूपाकाशात्मने स्पर्शाकर्षिणी नित्याकलायै नमः
दक्षजानुरूपश्रोत्रात्मने रूपाकर्षिणी नित्याकलायै नमः
दक्षगुल्फरूपत्वगात्मने रसाकर्षिणी नित्याकलायै नमः

दक्षापादतलरूपचक्षुरात्मने गन्धाकर्षिणी नित्याकलायै नमः
वामपादतलरूपजिह्वात्मने चित्ताकार्षिणी नित्याकलायै नमः
वामगुल्फरूपघ्राणात्मने धैर्याकर्षिणी नित्याकलायै नमः
वामजानुरूपवागात्मने स्मृत्याकर्षिणी नित्याकलायै नमः
वामोरुरूपपाण्यात्मने नामाकर्षिणी नित्याकलायै नमः
वामकरपृष्ठरूपपादात्मने बीजाकर्षिणी नित्याकलायै नमः
वामकूर्पररूपपाय्वात्मने आत्माकर्षिणी नित्याकलायै नमः
वामांसरूपोपस्थात्मने अमृताकर्षिणी नित्याकलायै नमः
वामश्रोत्रपृष्ठरूपविकृतमन आत्मने शरीराकर्षिणी नित्याकलायै नमः

हृद्रूपसर्वाशापरिपूरक चक्रेश्वर्यै त्रिपुरेश्वर्यै नमः॥
गुप्तयोगिनी रूपस्वात्मने लघिमासिध्यै नमः॥
अपरिच्छन्नरूपस्वात्मात्मने सर्वविद्राविणी मुद्रायै नमः

(१४)

(अष्टदळपद्माय नम इति तदन्तर्व्यापकं न्यस्य)
दक्षशंखरूपवचनात्मने अनङ्गकुसुमायै नमः
दक्षजत्रुरूपादानात्मने अनङ्गमेखलायै नमः
दक्षोरुरूपगमनात्मने अनङ्गमदनायै नमः
दक्षगुल्फरूपविसर्गात्मने अनङ्गमदनातुरायै नमः
वामगुल्फरूपानन्दात्मने अनङ्गरेखायै नमः
वामोरुरूपहानाख्यबुध्यात्मने अनङ्गवेगायै नमः
वामजत्रुरूपोपेक्षाख्यबुध्यात्मने अनङ्गाङ्कुशायै नमः
वामशंखरूपोपेक्षाख्यबुध्यात्मने अनङ्गमालिन्यै नमः।

हृद्रूपसर्वसंक्षोभणचक्रैश्वर्यै त्रिपुरसुन्दर्यै नमः।
गुप्ततरयोगिनीरूपस्वात्मात्मने महिमासिध्यै नमः।
अपरिच्छिन्नरूपस्वात्मात्मने सर्वाकर्षिणी मुद्रायै नमः।

(१५)

(चतुर्दशारचक्राय नम इति तदन्तर्व्यापकं न्यस्य।)

ललाटमध्यभागरूपालंबुसात्मने सर्वसंक्षोभिणीशक्त्यै नमः।
ललाटदक्षभागरूपकुह्वात्मने सर्वविद्राविणी शक्त्यै नमः।
दक्षगण्डरूपविश्वोदरात्मने सर्वाकर्षिणी शक्त्यै नमः॥
दक्षांसरूपवारुण्यात्मने सर्वाह्लादिनी शक्त्यै नमः॥
दक्षपार्श्वरूप हस्तिजिह्वात्मने सर्वसंमोहिनी शक्त्यै नमः॥
दक्षोरुरूपयशोवत्यात्मने सर्वस्तंभिनी शक्त्यै नमः।
दक्षजंघारूपपयस्विन्यात्मने सर्वजृम्भिणीशक्त्यै नमः॥
वामजंघारूपगान्धार्यात्मने सर्ववशंकरी शकत्यै नमः॥
वामोरुरूपपूषात्मने सर्वरञ्जिनी शक्त्यै नमः॥
वामपार्श्वरूपशांखिन्यात्मने सर्वोन्मादिनी शक्त्यै नमः॥
वामांसरूपसरस्वत्यात्मने सर्वार्थसाधिनी शक्त्यै नमः॥
वामगंडरूपेडात्मने सर्वसंपत्तिपूरणी शक्त्यै नमः॥
ललाटवामभागरूपपिंगळात्मने सर्वमन्त्रमयी शक्त्यै नमः॥
ललाटपृष्ठभागरूपसुषुम्नात्मने सर्वद्वन्द्वक्षयंकरी शक्त्यै नमः॥

हृद्रूपसर्वसौभाग्यदायकचक्रेश्वर्यै त्रिपुरवासिन्यै नमः॥
सम्प्रदाययोगिनीरूपस्वात्मात्मने ईशित्वसिध्यै नमः॥
अपरिच्छिन्नरूपस्वात्मात्मने सर्ववशंकरी मुद्रायै नमः॥

(१६)

(बहिर्दशारचक्राय नम इति व्यापकं न्यस्य।)

दक्षाक्षिरूपप्राणात्मने सर्वसिद्धिप्रदादेव्यै नमः॥
नासामूलरूपापानात्मने सर्वसम्पत्प्रदादेव्यै नमः॥

वामनेत्ररूपव्यानात्मने सर्वप्रियङ्करीदेव्यै नमः॥
कुक्षीशकोणरूपोदानात्मने सर्वमङ्गळकारिणी देव्यै नमः॥
कुक्षिवायुकोणरूपसमानात्मने सर्वकामप्रदादेव्यै नमः॥
वामजानुरूपनागात्मने सर्वदुःखविमोचिनीदेव्यै नमः॥
गुदरूपकूर्मात्मने सर्वमृत्युप्रशमनी देव्यै नमः॥
दक्षजानुरूपकरात्मने सर्वविघ्नविनाशिनी देव्यै नमः॥
कुक्षिनिर्ऋतिकोणरूपदेवदत्तात्मने सर्वांगसुन्दरी देव्यै नमः॥
कुक्षिवह्निकोणरूपधनञ्जयात्मने सर्वसौभाग्यदायिनीदेव्यै नमः॥
हृद्रूपसर्वार्थसाधकचक्रेश्वर्यै त्रिपुराश्रियै नमः॥
कुलकौलयोगिनीरूपस्वात्मात्मने वशित्वसिध्यै नमः॥
अपरिच्छिन्नस्वात्मात्मने सर्वोन्मादिनीमुद्रायै नमः॥

(१७)

(अन्तर्दशारचक्राय नम इति तदन्तर्व्यापकं न्यस्य॥)

दक्षनासारूपरेचकाग्न्यात्मने सर्वज्ञादेव्यै नमः॥
दक्षसृक्किरूपपाचकाग्न्यात्मने सर्वशक्तिदेव्यै नमः॥
दक्षस्तनरूपशोषकाग्न्यात्मने सर्वैश्वर्यप्रदादेव्यै नमः॥
दक्षवृषणरूपदाहकाग्न्यात्मने सर्वज्ञानमयी देव्यै नमः॥
सीविनीरूपप्लावकाग्न्यात्मने सर्वव्याधिविनाशिनी देव्यै नमः॥

(१८,१९)

वामवृषणरूपक्षारकाग्न्यात्मने सर्वाधारस्वरूपादेव्यै नमः॥

वामस्तनरूपोद्गारकाग्न्यात्मने सर्वपापहरादेव्यै नमः॥
वामसृक्किरूपक्षोभकाग्न्यात्मने सर्वानन्दमयीदेव्यै नमः॥
वामनासारूपजृम्भकाग्न्यात्मने सर्वरक्षास्वरूपिणीदेव्यै नमः॥
नासाग्ररूपमोहकाग्न्यात्मने सर्वेप्सितफलप्रदादेव्यै नमः॥

हृद्रूपसर्वरक्षाकरचक्रेश्वर्यै त्रिपुरमालिन्यै नमः॥
निगर्भयोगिनीरूपस्वात्मात्मने प्राकाम्यसिध्यै नमः॥
अपरिच्छिन्नरूपस्वात्मात्मने सर्वमहाङ्कुशामुद्रायै नमः॥

(२०)

(अष्टकोणचक्राय नम इति तदन्तर्व्यापकं न्यस्य॥)

चिबुकदक्षभागरूपशीतात्मनेवशिनी वाग्देवतायै नमः॥
कण्ठदक्षभागरूपोष्णात्मने कामेश्वरीवाग्देवतायै नमः॥
हृदयदक्षभागरूपसुखात्मने मोदिनीवाग्देवतायै नमः॥
नाभिदक्षभागरूपदुःखात्मने विमलावाग्देवतायै नमः॥
नाभिवामभागरूपेच्छात्मने अरुणावाग्देवतायै नमः॥
हृदयवामभागरूपसत्वगुणात्मने जयिनीवाग्देवतायै नमः॥
कण्ठवामभागरूपरजोगुणात्मने सर्वेश्वरीवाग्देवतायै नमः॥
चिबुकवामभागरूपतमोगुणात्मने कौलिनीवाग्देवतायै नमः॥
हृद्रूपसर्वरोगहरचक्रेश्वर्यै त्रिपुरासिद्धायै नमः॥
रहस्ययोगिनीरूपस्वात्मात्मने भुक्तिसिध्यै नमः॥
अपरिच्छिन्नक्षररूहपासस्वात्मात्मने सर्वखेचरीमुद्रायै नमः॥

(२१)

हृदयत्रिकोणाधोभागरूपपञ्चतन्मात्रात्मकेभ्यः सर्वजृम्भनबाणेभ्यो नमः॥

(२२)

तद्दक्षभागरूपमन आत्मकाभ्यां सर्वमोहनधनुर्भ्या नमः॥

(२३)

तदूर्ध्वभागरूपरागात्मकाभ्यां सर्ववशंकरपाशाभ्यां नमः॥

(२४)

तद्वामभागरूपद्वेषात्मकाभ्यां सर्वस्तम्भकराङ्कशाभ्यां नमः॥

(२५)

(त्रिकोणचक्राय नम इति व्यापकं न्यस्य॥)

हृदयत्रिकोणाग्रभागरूपमहत्तत्वात्मने वज्रेश्वर्यै देव्यै नमः॥
तद्वामकोणरूपाव्यक्तात्मने भगमालिनी देव्यै नमः॥
हृद्रूपसर्वसिद्धिप्रदचक्रेश्वर्यै त्रिपुरांबायै नमः॥
अतिरहस्ययोगिनीरूपस्वात्मात्मने इच्छासिध्यै नमः॥
अपरिच्छिन्नरूपस्वात्मात्मने सर्वबीजमुद्रायै नमः॥

(२६)

(बिन्दुचक्राय नम इति व्यापकं न्यस्य॥)

हृन्मध्यरूपनिरुपाधिकसंविन्मात्ररूपकामेश्वरांकनिलयायै सच्चिदानन्दैक ब्रह्मात्मिकायै परदेवतायै ललितायै महात्रिपुरसुन्दर्यै नमः॥

(२७)

(निरुपाधिकचैतन्यमेव सच्चिदानन्दात्मकमन्तःकरणप्रतिबिंबितंसत्तदहमेवे त्यनुसन्धानं ललितायालोहित्यमिति विभाव्य॥)

(अभेदसंबन्धेन सत्वाचिन्तवादि विशिष्टसंविदः केवलसंविदश्च तादात्म्य सम्बन्धरूपं कामेश्वरांकयन्त्रणं विशेषणं विभाव्य॥)

उपाध्यभावरूपशुक्लत्वोपलक्षिता सतीशुद्धसंविदेव शुक्लचरणः॥
चित्वविशिष्टसंवित्प्राथमिकपराहन्तात्मकमृत्युरूपेणरागेणोपलक्षितासती रक्तचरणः॥

(अहमाकारवृत्तिनिरूपिता विषयता चरणयोर्मिथो विशेष्यविशेषणभावरूपैव तदुभयसामरस्यमिति विभाव्य॥)
हृद्रुपसर्वानन्दमयचक्रेश्वैय महात्रिपुरसुन्दर्यै नमः।
परापररहस्ययोगिनीरूप स्वात्मात्मने प्राप्तिसिध्यै नमः॥
अपरिच्छिन्नरूपस्वात्मात्मने सर्वयोनिमुद्रायै नमः॥

इति तत्तत्स्थानस्पर्शपूर्वकं सम्यगनुसन्धायोपचारान् समर्पयेत्॥

तद्यथा-

एवमपरिच्छन्नतया भाविताया ललितायाः स्वेमहिम्न्येवप्रतिष्ठिति मासनमनुसन्धामि॥

(३०)

वियदादिस्थूलप्रपञ्चरूपपादगतनामरूपात्मकमलस्य सच्चिदानन्दैकरूपत्व भावनाजलेन क्षाळनं पाद्यं भावयामि॥
सूक्ष्मप्रपञ्चरूपहस्तगतस्य तस्य क्षाळनमर्घ्यं चिन्तयामि॥
भावनारूपाणामपामपि कबलीकाररूपमाचमनं भावयामि॥
सत्त्वचित्त्वानान्दत्वाद्यखिलावयवावच्छेदेन भावनाजलसम्पर्करूप स्नानमनुचिन्तयामि॥
तेष्वेवावयवेषु प्रसक्ताया भावनात्मकवृत्तिविशेष्यतायाः प्रोञ्छनं वृत्य विषयत्वभावनेन वस्त्रं कल्पयामि॥
निर्विषयत्वनिरञ्जनत्वाशोकत्वामृतत्वाद्यनेकधर्मरूपाण्याभरणानि धर्म्यभेदभावनेन समर्पयामि॥
स्वशरीरघटकपार्थिवभागानां जडतापनयेन चिन्मात्रतावशेषरूपं गन्धं प्रयच्छामि॥
आकाशभागानां तथा भावनेन पुष्पाणि समर्पयामि॥
वायव्यभागानान्तथाभावनया धूपयामि॥
तैजसभागानान्तथाकरणेनोद्दीपयामि॥

अमृतभागांस्तथा विभाव्य निवेदयामि॥
षोडशान्तेन्दुमण्डलस्य तथा भावनेन ताम्बूलकल्पमाचरामि॥
परापश्यन्त्यादिनिखिलशब्दानां नादद्वारा ब्रह्मण्युपसंहारचिन्तनेन स्तवीमि॥

(३१)

विष्येषु धावमानानां चित्तवृत्तीनां विषयजडतानिरासेन ब्रह्मणि प्रविलाप नेन प्रदक्षिणीक्ररोमि॥
तासां विषयेभ्यः परावर्तनेन ब्रह्मैकप्रवणतया प्रणमामि॥

(इत्युपचर्य जुहुयात्॥)

विहिताविहितविषयावृत्तयः उत्पन्नाः अहं त्वं गुरुर्देवतेत्यादयः तास्सर्वा श्चक्रराजस्थानन्तशक्तिकदम्बरूपास्तत्तत्सूक्ष्मरूपा ये ये संस्कारातस्तत्सर्व चिन्मात्रमेवेति विभावनया निर्व्युत्थानं स्वात्मनि जुहोमि॥

(३२)

प्रकृतभावनासु ये गुरुचरणादिशक्तिकदम्बान्ताविषयास्ते सर्वेपि चिन्मात्र रूपान् परस्परं भिद्यन्ते इति भावनया तर्पयामि॥

(३३)

तिथिचक्रमुक्तरूपं कालचक्रं देशचक्रं च सर्वमस्ति भाति प्रियं च न तु नामरूपवदतस्सर्वं ब्रह्मैवेति विभावयामि॥

(३४)

अथवा पूर्वलिखितां नित्याभावनामिहैव श्वासप्रविलापनफलिकां कुर्यात्
तेन मनः पवनात्मनामैक्यनिभालनेन त्रीन्मुहूर्तान् द्वावेकं वा मुहूर्तमविच्छिन्नं
व्यापयेत्। तस्य देवतात्मैक्यसिद्धिः चिन्तितकार्याण्ययत्नेन सिध्यन्ति॥

(ततोऽवतीर्य प्राणायामत्रयमृष्यादिन्यासत्रयंच कृत्वा गुरुं स्तुवीतेति सर्वं शिवम्॥)

अथर्वशिरसि प्रोक्तभावनानां सतां मुदे।
इति भास्कररायेण प्रयोगविधिरीरितः॥
श्यामे संगीतमातः परशिवनिलये मुख्यसाचिव्यभारो
द्वाहे दक्ष दयापूरितनिजहृदये मामकीं दैन्यवृत्तिम्।
श्रीमत्सिंहासनेश्यां भववनपतितान्दावदग्धान्नमस्ते
त्रातुं पीयूषवर्षैः कथय परिकरं बद्धवत्यां विविक्ते॥

यत्रास्ति भोगो न च तत्र मोक्षः यत्रास्ति मोक्षो न च तत्र भोगः।
श्रीसुन्दरीसाधकपुंगवानां भोगश्च मोक्षश्च करस्थ एव॥

पातय वा पाताले स्थापय वा सकललोकसाम्राज्ये।
मातस्तवांघ्रियुगलं नाहं मुञ्चामि नैव मुञ्चामि॥

यश्शिवो नामरूपाभ्यां या देवी सर्वमङ्गळा।
तयोः संस्मरणात्पुंसां सर्वतो जयमङ्गळम्॥

दुर्गे शिवेऽभये माये नारायणि सनातनि।
जये मे मङ्गळे देहि नमस्ते सर्वमङ्गळे॥

इति श्रीः॥

श्रीतन्त्रराजे पञ्चत्रिंशपटले भावनोपनिषत्प्रतिपादित

महायागक्रमस्योपबृह्मणश्लोकाः

अथ षोडशनित्यानां स्वात्मत्वे वासनां श्रृणु।
यया तन्मयतासिद्धिः प्रत्यक्षा भवति ध्रुवम्॥१॥

गुरुराद्या भवेच्छक्तिः सा विमर्शमयी मता
नवत्वं तस्य देहस्य रन्ध्रत्वेनावभासते॥२॥

बलिदेव्यः स्वमायाः स्युः पञ्चमी जनकात्मिका
कुरुकुल्ला भवेन्माता पुरुषार्थास्तु सागराः॥३॥

रत्नद्वीपो भवेद्देहो नवत्वं धातुरोमभिः।
संकल्पाः कल्पतरवः स्वाधारा ऋतवः स्मृताः॥४॥

ग्रहर्क्षराशिचक्रेण कालात्मा पश्चिमामुखः
तेन पूर्वाभिमुख्यं स्यादन्यत्ते कथितं मिथः॥

ज्ञाता स्वात्मा भवेत् ज्ञानमर्घ्यं ज्ञेयं बहिः स्थितम्।
श्रीचक्रपूजनं तेषामेकीकरणमीरितम्॥६॥

श्रीचक्रे सिद्धयः प्रोक्ता रसा नियतिसंयुताः।
ऊर्मयः पुण्यपापे च ब्राह्मयाद्या मातरः स्मृताः॥७॥

भूतेन्द्रियमनांस्येव क्रमान्नित्याकलाः पुनः।
कर्मेन्द्रियार्थौ दोषाश्च ज्ञेयाः स्युः शक्तयोष्ट वै॥८॥

नाड्यश्चतुर्दश प्रोक्ताः क्षोभिण्याद्यास्तु शक्तयः।
वायवो दशसंप्रोक्ताः सर्वसिध्यादिशक्तयः॥९॥

बह्नयो दशसंप्रोक्ताः सर्वज्ञाद्यास्तु शक्तयः।
शीतोष्णसुखदुःखेच्छा गुणाः प्रोक्ताः क्रमेण वै॥१०॥

वशिन्याद्याश्शक्तयः स्युः तन्मात्राः पुष्पसायकाः।
मनो भवेदिक्षुधनुः पाशो राग इतीरितः॥११॥

द्वेषः स्यादङ्कुशः प्रोक्तः क्रमेण वरवर्णिनि ।
अव्यक्ताहङ्कृतिमहदाकाराः प्रतिलोमतः॥

कामेश्वर्यादिदेव्यस्स्युः संवित्कामेश्वरः स्मृतः।
स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा॥१२॥

लौहित्यं तद्विमर्शः स्यादुपास्तिरिति भावना।
सिद्धिस्त्वनन्यचित्तत्वं मुद्रा वैभवभावनम्॥१३॥

उपचाराश्चलत्वेपि तन्मयत्वाप्रमत्तता।
प्रयोगास्तु विकल्पानां हेतोः स्वात्मनि नाशनम्॥१४॥

यन्त्राणि मन्त्रास्सर्वत्र स्वात्मत्वे स्थैर्यसाधन ।
सन्ध्यासु भजनं देव्या आदिमध्यान्तमज्जनं॥१५॥

अन्यास्तु शक्तयश्चक्रगामिन्यो याः समन्ततः
तास्तु विश्वविकल्पानां हेतवस्समुदीरिताः॥१६॥

न्यासस्तु देवतात्वेन स्वात्मनो देहकल्पनम्।
जपस्तन्मयतारूपभावनं सम्यगीरितम्॥१७॥

होमो विश्वविकल्पानां स्वात्मन्यस्तमयो मतः।
तेषामन्योन्यसंभेदभावनं तर्पणं भवेत्॥१८॥

मोहाज्ञानादिदुःखानामात्मन्यस्तमयो दृढम् ।
अभिषेकस्तु विद्या स्यादात्मा सर्वाश्रयो महान्॥१९॥

उपाधीनां तु राहित्यं उपदेश इतीरितः।
दक्षिणाभेदशून्यत्वं शुश्रूषा स्थैर्यमुच्यते॥२०।

तिथिरूपेण कालस्य परिणामावलोकनम् ।
नित्याः पञ्चदशैताः स्युरिति प्रोक्तास्तु वासनाः॥

इति श्रीः॥

श्रीललिताचतुष्षष्ट्युपचारसंग्रहः

ओं॥ हृन्मध्यनिलये देवि ललिते परदेवते।
चतुष्षष्ट्युपचारांस्ते भक्त्या मातस्समर्पये॥१॥

कामेशोत्संगनिलये पाद्यं गृह्णीष्व सादरम्।
भूषणानि समुत्तार्य गन्धतैलं च तेऽर्पयं॥२॥

स्नानशालां प्रविश्याथ तत्रस्थ मणिपीठके।
उपविश्य सुखेन त्वं देहोद्वर्त्तनमाचर ॥३॥

उष्णोदकेन ललिते स्नापयाम्यथ भक्तितः।
अभिषिञ्चामि पश्चात्त्वां सौवर्णकलशोदकैः॥४॥

धौतवस्त्रप्रोञ्छनं चारक्तक्षौमांबरं तथा।
कुचोत्तरीयमरुणमर्पयामि महेश्वरि॥५॥

ततः प्रविश्य चालेयमण्टपं परमेश्वरि।
उपविश्व च सौवर्णपीठे गन्धान्विलेपय॥६॥

कालागरुजधूपैश्च धूपये केशपाशकम्।
अर्पयामि च माल्यादि सर्वर्त्तुकुसुमस्रजः॥७॥

भूषामण्टपमाविश्य स्थित्वा सौवर्णपीठके।
माणिक्यमकुटं मूर्ध्नि दयया स्थापयांबिके॥८॥

शरत्पार्वणचन्द्रस्य शकलं तत्र शोभताम्।
सिन्दूरेण च सीमन्तमलङ्कुरु दयानिधे॥९॥

फाले च तिलकं न्यस्य नेत्रयोरञ्जनं शिवे।
वालीयुगळमप्यम्ब भक्त्या ते विनिवेदये॥१०॥

मणिकुण्डलमप्यम्ब नासाभरणमेव च।
ताटङ्कयुगळं देवि यावकश्चाधरेऽर्पये॥११॥

अद्यभूषणसौवर्णाचिन्ताकपदकानि च।
महापदकमुक्तावल्येकवल्यादि भूषणम्॥१२॥

छन्नवीरं गृहाणाम्ब केयूरयुगलंतथा।
वलयावलिमंगुल्याभरणं ललिताम्बिके॥१३॥

ओड्याणमथ कट्यान्ते कटिसूत्रं च सुन्दरि।
सौभाग्याभरणं पादकटकं नूपुरद्वयम्॥१४॥

अर्पयामि जगन्मातः पादयोश्चांगुलीयकम्।
पाशं वामोर्ध्वहस्ते ते दक्षहस्ते तथाङ्कुशम्॥१५॥

अन्यस्मिन्वामहस्ते च तथा पुंण्ड्रेक्षुचापकम्।
पुष्पबाणांश्च दक्षाधः पाणौ धारय सुन्दरि॥१६॥

अर्पयामि च माणिक्यपादुके पादयोश्शिवे।
आरोहावृतिदेवीभिश्चक्रं परशिवे मुदा॥१७॥

समानवेषभूषाभिस्साकं त्रिपुरसुन्दरि।
तत्र कामेशवामाङ्कपर्यङ्कोपनिवेशिनीम्॥१८॥

अमृतासवपानेन मुदितां त्वां सदा भजे।
शुद्धेन गांगतोयेन पुनराचमनं कुरु ॥१९॥

आनन्दोल्लासहासेन विलसन्मुखपङ्कजाम्॥२०॥

भक्तिमत्कल्पलतिका कृतीस्यां त्वां स्मरन् कदा।
मङ्गळारार्तिकं छत्रं चामरं दर्पणंतथा॥२१॥

ताळवृन्तं गन्धपुष्पधूपदीपांश्च तेऽर्पये।
श्रीकामेश्वरीतप्तहाटककृतैः स्थालीसहस्त्रैर्भृतं
दिव्यान्नं घृतसूपशाकभरितं चित्रान्नभेदैर्युतम्।
दुग्धान्नं मधुशर्करादाधियुतं माणिक्यपात्रार्पितं
माषापूपकपूरिकादिसहितं नैवेद्यमम्बार्पये॥२२॥

साग्रविंशतिपद्योक्तचतुष्षट्युपचारतः।
हृन्मध्यनिलया माता ललिता परितप्यतु॥२३॥

श्रीमुखाख्यस्य वर्षस्य तुलायां शुक्लपक्षके।
चतुर्थ्यामपराह्ने च ललितार्पितमानसः॥२४॥

साग्रविंशतिपद्यैस्तु चतुष्षष्ट्युपचारकान्।
समग्रहीत् पराम्बायाः प्रीत्यै नारायणो मुदा॥२५॥

नारायणःश्रीपुरुषोत्तमात्मजोऽलिखन्महीशूरपुरेवसन्कृती।
देवीसपर्यामखिलाभिलाषदां कामेशवामाङ्कगता प्रसीदतु ॥२६॥

ओंतत्सदिति श्रीः॥ इति देवी चनुष्षष्ट्युपचारपूजासंग्रहः सम्पूर्णः॥

This is a composition of the late Ashtāna-vidvān Branhma-śrī K.P. Narayana-śāstri, Professor of Advaita, Chamarajendra Sanskrit College, Bangalore. It summarizes the mental worship of Lalitā.

ŚRĪ CHAKRA

TRIPUROPANISHAD - with BHĀSHYA of Bhāskara-rāya

अथ त्रिपुरोपनिषदः शान्तिमन्त्र पाठः
(भाष्यसमेतः)

ŚĀNTI-PĀṬHA

ओं वाङ्मे मनसि प्रतिष्ठिता-मनो मे वाचि प्रतिष्ठितम् ॥

तत्वविद्याप्रतिपादकग्रन्थपाठे प्रवृत्तो मे वाक् सर्वदा मनसि प्रतिष्ठिता। मनो विवक्षितशब्दजात-प्रतिपादिकेति यावत्॥ मनश्च मदीय वाचि प्रतिष्ठितंआत्मविद्याप्रतिपादकमेव शब्दजातं मनसा विवक्ष्यते। अन्योन्यानुगृहते हि वाङ्मनसे विद्यार्थग्रन्थं साकल्येनावधारयितुं शक्नुतः। मनसस्सावधानत्वाभावे यत्किंचिदसंगतं ब्रूयात् - तथा वाचः पाटवाभावे विवक्षितं न यथावदुच्चार्यते - अतस्तयोः परस्परानुकूल्यप्रार्थना क्रियते इति भावः॥

आविरावीर्म एधि ॥

आविश्शब्देन स्वप्रकाशं ब्रह्मचैतन्यमुच्यते॥ हे परमात्मन् मे आविरेधि। अविद्यावरणापनयेन मे प्रकटीभवेत्यर्थः॥

वेदस्य म आणीस्थः । श्रुतं मे मा प्रहासीः ॥

हे वाङ्मनसे तत्वविद्याप्रतिपादकवेदग्रन्थस्य-मे-मदर्थम् आणी-आनयन समर्थे भवतमित्यर्थः। हे श्रोत्रेन्द्रिय, मदर्थं त्वया श्रुतं ग्रन्थजातं मा प्रहासीः मा विस्मरेत्यर्थः॥

अनेनाधीतेनाहोरात्रान् सन्दधामि ऋतं वदिष्यामि । सत्यं वदिष्यामि ॥

अनेनाधीतेनोपनिषद्ग्रन्थेन विस्मरणरहितेनाहोरात्रान् संयोजयामि। अहनि रात्रौ चालस्यं परित्यज्य निरन्तरं पठामीत्यर्थः॥ पठिते च ग्रन्थे। ऋतं-परमार्थभूतं वस्तु वदिष्यामि-विरपीतार्थवदनं

कदाचिदपि माभूदित्यर्थः।। ऋतं-मानसं-सत्यं-वाचिकं-मनसा वस्तुतत्वं विचार्य वाचा वदिष्यामीत्यर्थः।।

तन्मामंवतु तद्वक्तारंमवतु अवंतुमामवंतुवक्तारंमवंतुवक्तारं ।।
ओं शान्तिश्शान्तिश्शान्तिः ।।

तद्ब्रह्मतत्वं। मां शिष्यं। सम्यग्बोधेन पालयतु आचार्यश्च बोधकत्वसामर्थ्यप्रदानेन पालयतु।। पुनरप्यवतुमामिति फलप्रार्थनाअविद्यानिवृत्तिविषयिणी क्रियतेआचार्यस्य तु तादृशशिष्यलाभेन विद्यासम्प्रदायाविच्छेदलाभ फलम्।। अनेन मन्त्रपाठेन पूर्वं विद्याप्रतिबन्धकविघ्नाः परिह्रियन्ते विद्योत्पत्तेरूर्ध्वन्तु असम्भावनाविपरीतभावनोत्पादकविघ्नाः।।

अभ्यासोऽध्यायसमाप्त्यवद्योतकः।। इति शान्तिमन्त्रार्थः।। श्रीः।।

श्रीत्रिपुरोपनिषत्
(भाष्यसहिता)

सहस्रदलपद्मे स्वे नाथांघ्र्यब्जद्वये सति।
कमले कमलोत्पत्तिर्नदृष्टेत्युक्तयः कथम् ॥

श्रीसांख्यायनकल्पसूत्रविधिभिः कर्माणि ये कुर्वते-
येषां शाकल एव मन्त्रनिचयः कौषितकं ब्राह्मणम्।
तैरारण्यकमध्यमन्त्रविततिर्या पठ्यते बह्वचैः
ऋग्भिषोडशाभिर्महोपनिषदं व्याचक्ष्महे तां वयम्॥

इह खलु त्रैवर्णिकैरध्येतव्यो वेदः पूर्वोत्तरकाण्डभेदेन द्विविधः॥

अधिकारिणस्तु देहातिरिक्त आत्मापरलोकयातायातक्षमोऽस्तीति विश्वासशीला एवामुष्मिकफलक्रियासु यथाधिक्रियन्ते, तथा तेष्वपि देवतानामास्मदादिभिरदृश्यमानाप्यभिमतफलदानक्षमा काचिदस्तीति विश्वासशीला एव रामकृष्णाद्युपास्तावधिक्रियन्ते॥

ईदृश जनाभिप्रायेणैव देवतानां विग्रहादिपञ्चकं समर्थितं बादरायणादिभिः॥ येषान्तु देवतासद्भावे जन्मान्तरकर्मवशादनाश्वासः आस्तिकता च ते पूर्वकाण्डोक्तकर्मस्वेवाधिकारिणः न देवतोपासनायां-तादृशजनाभिप्रायेणैव देवतानां विग्रहादिपञ्चकनिरासेन कर्मप्राधान्यवादस्समर्थितो जैमिन्यादिभिः। अतएव तादृश कर्मठानमेव कर्मपरिपाकवशात्कतिपयानां शिवशक्तिपूजायां प्रवृत्तौ सत्यां, मीमांसकमतपरित्यागप्रयुक्तोपहासो वृत्तौ वर्णितो मृगेन्द्रसंहितायां॥

ये तु देवतोपासकास्तैरपि विग्रहादि पञ्चकापह्नवामिप्रायरहस्यं जानानैरपि कर्मप्राधान्यवादो न निरसनीयः। तथात्वे तादृशकर्मठानां चित्तपरिपाकविशेषमन्तरेण समर्थ्यमानार्थे विश्वासानुदयात् निरसनयुक्तिभिस्तदवलम्बितार्थे सन्देहोदये तेषामुभयभ्रष्टतापत्तेः। अत एव तेषां संरक्षणार्थमेवोपासकैरपि तानि कर्माणि तद्वदेव सविश्वासमिव कार्याण्येव॥ एतदभिप्रायेणैव लोकसंग्रहमेवापि सम्पश्यन् कर्तुमर्हसि॥ इत्यादि विधयः॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनां इत्यादि निषेधाश्च॥

उत्तरभूमिकाधिरूढैरपि पूर्वभूमिकायास्समर्थनं स्वभूमिकाया अप्रकाशनञ्चावश्यं कार्यमिति तु पिण्डितोर्थः॥ तेनैतौ विधिनिषेधौ निस्त्रैगुण्ये पथि विचरतां जीवन्मुक्तानामप्यावश्यकाविति सिध्यति॥

येषान्तु बहु जन्मसु पूर्वकाण्डोक्तकर्मानुष्ठानवशाच्चित्तपरिपाकविशेषो दृढो दृश्यते तादृशान्प्रति तु सम्यक् परीक्ष्य स्वभूमिकाया शनैश्शनैः प्रकाशनीयैव॥ अन्यथा सम्प्रदायविच्छेदापत्तेः। त्रिपुरसुन्दर्युपास्तिपर्यन्ता ये भूमिकाभेदास्ते तु सविस्तारं वामकेश्वरतन्त्रव्याख्याने सेतुबन्धाख्याने अस्माभिः प्रदर्शिताः। उपासनाशास्त्रे तु देवताप्राधान्यमेव न कर्मणः प्राधान्यम्। क्रियाप्राधान्याभावादेव देवतारूपसिद्धवस्तुबोधका वेदान्ता इति वाचोयुक्तिः। देवतायाश्च त्रीणि रूपाणि स्थूलं सूक्ष्मं परञ्चेति। तत्राद्यं तत्तद्ध्यानश्लोकोक्तं(स्थूलं, मन्त्र १०)-द्वितीयं तत्तन्मूलमन्त्रात्मकं (मध्यं, मन्त्र ८) तृतीयन्तु वासनात्मकम् (सूक्ष्मं, मन्त्र ७)॥ देवतारूपत्रैविध्यादेव तदुपास्तिरपि त्रिविधा। बहिर्याग जपान्तर्यागभेदात्॥

तदिदं सपरिकरमृग्वेदपुरुषो महोपनिषद्रूपेणोपदिशति तिस्रः पुरः इत्यादिना इत्युपनिषदित्यन्तेन॥ अस्या उपनिषदः परदेवतास्तुतौ विनियोगः तृतीयदशमर्चमन्त्रलिंगात्॥

तिस्रः पुरस्त्रिपथा विश्वचर्षणी यत्राकथा अक्षरा सन्निविष्टा॥
अधिष्ठायैनामजरा पुराणी महत्तरा महिमा देवतानाम्॥

तत्र प्रधानदेवतां निर्देष्टुं प्रथमामृचमाह तिस्रः पुर इत्यादि॥

तत्र मुक्तिस्तावत्पञ्चविधा-सालोक्यमेकं (स्थूलं), सामीप्यसारूप्यसायुज्यत्रितयं (मध्यं) कैवल्यञ्चेति (सूक्ष्मं)॥ तास्वाद्यान्त्यौ प्रत्येकं द्वौ मार्गौ-मध्यमत्रयमेको मार्गः। तथा च त्रैत्तिरीया आमनन्तिय एवं विद्वानुदगयते प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यँस्सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो महिमानम्॥ इति। अयं भावः। ऊर्ध्वरेतसां स्वाश्रमोक्तकर्मानुष्ठानवतां चन्द्रलोकप्राप्तिस्सालोक्यरूपा प्रतीकोपासनया स्वस्वामिभावेनोपासनया अहंग्रहोपासनया च

सामीप्यादि त्रितयरूपा आदित्यलोकप्राप्तिः ॥ निर्गुणोपास्तिरूपब्रह्मज्ञानवतान्तु कैवल्यरूपब्रह्मपदप्राप्तिरिति ॥

एतन्मार्गत्रितयमेव स्पष्टमुपबृंहितं विष्णुपुराणे तृतीयांशे ॥ उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणं-पितृयाणस्सवै पन्था वैश्वानरपथाद्बहिरित्यादिना विवेकज्ञानदृष्टं च तद्विष्णोः परमं पदं इत्यन्तेन मार्गत्रैविध्यादेव गन्तव्याः पुर्योऽपि तिस्रः। ईदृशपुरत्रयप्रापकत्वात् तद्रूपत्वाद्वा परदेवता त्रिपुरेत्युच्यते ॥

आत्मबुध्या प्रतीकेन मातृ-बुध्याप्यहन्धिया कर्मणापि भजन्मर्त्यः कैवल्यं पदमश्नुते॥ इति शक्ति-रहस्यवचनेन पञ्चविधात्मभजनेनापि त्रैपुरप्राप्तेरुक्तत्वात्॥ तस्मात् सैव तिस्रः पुरः त्रिपुरा। त्रयः पन्थानो यस्या स्सा त्रिपथा। तत्पुरुषानंगीकारादेव पथस्संख्याव्ययादेरिति नपुंसकत्वं न।

चर्षणीशब्दो वैदिक निघण्टुरीत्या प्रजावाचकः। विश्वास्समस्ताश्चर्षणयो यस्यां सा विश्वचर्षणीदेव्येव समस्तप्राण्युत्पादिकेति यावत्॥ विश्वदृष्टिर्वा इदमत्र बोध्यं॥

तदैक्षत बहुस्यां प्रजायेयेति श्रुतिसिद्धं यद्ब्रह्मणः प्राथमिकमीक्षणं तदेव सर्वजनकं, तदेवेच्छारूपं, कृतिरूपञ्च॥ सोऽकामयत तपोऽकुरुत इति श्रुत्यन्तरात्। स्वाभाविकी ज्ञानबलक्रिया चेति श्रुत्यापि एकैव ब्रह्माभिन्ना प्राथमिकी वृत्तिः ज्ञानेच्छाकृतिरूपेति प्रतिपाद्यते ॥

सा वृत्तिरेवेच्छाज्ञानक्रियासमष्टिरूपत्वात् शान्तेत्युच्यते ॥ पश्यन्ती मध्यमावैखरीत्रयसमष्टिसूक्ष्मरूप-त्वात्परेत्युच्यते। वामाज्येष्ठारौद्रीसमष्टिरूपत्वादम्बिकेत्युच्यते ॥ सा शान्तात्मिका देवतैव श्रीचक्रस्थं बिन्दुचक्रम् ॥

तदुक्तं नित्याहृदये परं ब्रह्म प्रक्रम्य॥
प्रसृतं विश्वलहरीस्थानं मातृत्रयात्मकं।
बैन्दवं चक्रमित्यादि॥

तदेव च तिस्रः पुरः त्रिपथा विश्वचर्षणी इति विशेषणत्रयनिर्दिष्टं॥ विशेषणेषु बहुवचनैकवचनाभ्यां विशेष्यस्य त्रित्रिरूपत्वमेकात्मकत्वञ्च सूचितं॥ तादृशमीक्षणावच्छिन्नं ब्रह्म प्रक्रभ्य कालिकापुराणेऽप्युक्तं॥

त्रिकोणमण्डलश्चास्या भूपुरं च त्रिरेखकं।
मन्त्रोपि त्र्यक्षरः प्रोक्तः तथा रूपत्रयं पुनः।
त्रिविधा कुण्डली शक्तिः त्रिदेवानां च सृष्टये
सर्वत्रयं त्रयं यस्मात्तस्मातु त्रिपुरा मता।

इत्यादि॥

अर्थसृष्टिजनकत्वेन तां निर्दिश्य, शब्दसृष्टिजनेकत्वेनापि तां निर्दिशति यत्रेति। यत्र यस्यां शान्ताम्बिकादिरूपायां त्रिपुरायां अकथाः अकाराद्याः ककाराधेद्याः थकाराद्याः षोडशषोडश अक्षरा संनिविष्टा। अक्षराणि सन्निविष्टानि वटबीजे वृक्षवत् सम्यक् नितरां च वर्तन्ते।

The three shoḍaśa-groups:

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः (१६)
क ख ग घ ङ च छ ज झ ज झ ञ ट ठ ड ढ ण त (१६)
थ द ध न प फ ब भ म य र ल व श ष स (१६)

represent the world of objects.

हकारो हि विमर्शस्वरूप एवेति न व्यष्टिवेषेण पृथक् गृह्यते हकारार्णः कलारूपो विमर्शाख्यः प्रकीर्तितः। इति वचनात्। ळकारस्तु लकारान्नभिद्यते॥ क्षकारस्तु कषसंसर्गरूप एव न स्वतन्त्रः। तस्मादष्टाचत्वारिंशन्मातृकाः॥ एता एव मातृकाः। तथाच सूचसंहितायां

एकधा च द्विधा चैव तथा षोडशधा स्थिता।
द्वात्रिंशद्भेदसंभिन्ना या तां वन्दे परां कलां॥

इति॥

द्विधा स्वरव्यञ्जनभेदेन स्वरः षोडशरूपः। व्यञ्जनं द्वात्रिंशद्भेदमित्यर्थः॥ अक्षरादिपदद्वये जसोडादेशश्छान्दसः॥ एवं पूर्वार्धेन बिन्दुचक्रस्वरूपमुपदिश्य तदधिष्ठात्रीं उपास्यां परदेवतामाहाधिष्ठायेति॥ एनां साम्प्रतमुपदिष्टां बिन्दुरूपां त्रिपुरामधिष्ठाय काचित् अस्ति देवता॥ अस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोप्यस्ति इति कात्यायनवचनादस्तेरध्याहारः॥ उत्तरमन्त्रस्थक्रियया वाऽल्यपोन्वयः॥

सा देवता अजरा मरणरहिता जृवयोहानावित्यत्र वयोहानिपदेन वयस्यो नाशस्यैव कथनात्॥ पुराणी-अनादिः। जन्मरहिता देवतानां ब्रह्मविष्णुशिवादीनामिति प्रसिद्धानां मध्ये महत्तरा सर्वोत्कृष्टा। तासां देवतानां यो महिमा तद्रूपा च। देवतान्तराणां माहात्म्यस्याप्येषैव निदानं एतदुपासनयैव तेषां महिमलाभ इति भावः॥

त्रिपुरोपनिषदि तदनुयायिपुराणतन्त्रादिषु च शिवविष्ण्वाद्युपासितानां विद्यानां बहुशः प्रदर्शनात् ''शंभुः पूजयते देवीं मन्त्रशाक्तिमयीं शुभां''॥ इत्यादिना निखिलदेवपूजनीयप्रतिमाभेदानां पद्मपुराणे विस्तरेण कथनाच्च। तथा च ''न भिक्षुको भिक्षुकान्तरं याचितुमर्हति। सत्यन्यस्मिन्नभिक्षुके'' इति न्यायेन देवतान्तरोपास्यापेक्षया परदेवतोपास्तिरेव ज्यायसी इति तु ध्वन्योर्थः॥ तदिदमस्माभिरुक्तं परशिवस्तेव॥

> त्वद्दत्तैश्वर्यभाजः परशिवकथंकारमन्यान् सुरेन्द्रान्
> याचे देहीति शक्रद्रुहिणहरिमुखान् भिक्षुकान् भिक्षुकोऽहं।
> अज्ञोपि द्वादशाहक्रतुविकृतिशतस्यांगभूतोपि चोक्थ्यो
> ज्योतिष्टोमोक्थ्यधर्मानभिलषति न तु द्वादशाहोक्थ्यधर्मान्

इति॥ अजरेत्यादिभिर्ब्रह्मलिंगैर्बिन्दुचक्राधिष्ठात्री देवता परंब्रह्मैव इत्युक्तं भवति। देवतापदस्य विशेष्यत्वाभिप्रायेण स्त्रीत्वं अजरादिपदानां अत एव श्रुत्यन्तरे क्लीबनिर्देशः॥ तथा च स्पष्टमेवाथर्वणा आमनन्ति।

> अष्टाचक्रा नवद्वारा देवानां पूरयोद्या तस्यां हिरण्मयः कोशः
> स्वर्गो लोको ज्योतिषावृतः तस्मिन् हिरण्मये कोशे त्र्यस्रे
> त्रिप्रतिष्ठितं तस्मिन् यद्यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः॥

भूपुरादित्रिकोणान्तचक्राष्टकोपरि यः कोशो गर्भीकृतरूपत्रयो बिन्दुरिति यावत्॥ तस्मिन् यक्षं महद्भूतमस्ति। बहिःपूजाऽयोग्यत्वाद्यक्षपदेन निर्देशः। तत् स्वात्मनि ब्रह्मविद एव विदुः। नान्ये इत्यर्थः इति सेतुबन्धे विस्तरः॥

एवं बिन्दुचक्रमुक्त्वा त्रिकोणवसुकोणचक्रद्वयसमष्टिरूपं (१+८) नवयोन्यात्मकं (संहार) चक्रमुपदेष्टुं द्वितीयामृचमाह॥ नवयोनीरिति

नवयोनीर्नवचक्राणि दधिरे नवैवयोगा नवयोगिनीश्च॥
नवानां चक्रे अधिनाथास्योना नवमुद्रा नवभद्रा महीनां॥२॥

तिस्रः पुरो नवयोनीर्दधिरे एकमपि बिन्दुचक्रं त्र्यात्मकत्वात् प्रत्येकं रूपत्रयं दध्रे इति दीधीङ् दीप्तिदेवनयोरिति च्छान्दसधातोरिदं रूपं। दीपनं च प्रकाशनं (मेव), फलत उत्पादनमेवेह विवक्षितोऽर्थः॥

शान्तात्वावच्छेदेनेच्छाशक्तिः क्रियाशक्तिः ज्ञानशक्तिः चेति तिस्रो देवता उदपादयत् अम्बिकात्वावच्छेदेन ब्रह्मविष्णुरुद्रान् स्त्रीरूपान् वामाज्येष्ठारौद्रीशक्तिनामकानजनयत्। परात्वावच्छेदेन पश्यन्तीमध्यमावैखरीति बाग्देवता अजीजनत् इत्यर्थः। सा परदेवतैवैनां त्रिपुरामधिष्ठाय नवयोनीश्चक्रे इति वान्वयः॥

एता नवदेवता एव नवयोनिचक्रात्मना परिणता इति वासनाध्वनिः॥ जातजनिष्यमाणानि संस्कारात्मना नवयोनिष्वेव सन्ति। तदेतदाह नवचक्राणि कर्तॄणि नवयोनीर्दधिरे इति॥

शक्तित्रिकोणद्वयेन वह्नित्रिकोणेनैकेन च नवयोनि चक्रनिष्पत्तिः। प्रतित्रिकोणं तिस्रो रेखा इति नवानां रेखाणां योगा अपि कोणरूपा नवैव॥ तेन नवयोगिनीर्दधिरे। नवचक्राणामिह सत्वादेव तत्रत्य प्रकटादियोगिनीनवकमपि कोणात्मनेहैव तिष्ठतीति भावः॥

देशकालानवच्छिन्नं तदूर्ध्वं परमं महः। इत्यादि व्यवहारात् देशाद्यवच्छिन्नो बिन्दुचक्रादिप्रपञ्चो ब्रह्मणोऽधोधस्तिष्ठतीति लभ्यते। एवन्मूलक एव श्रीचक्रस्य मेरुप्रस्तारोऽपि।

Basic figure from which Śrī-chakra is derived:



तेनैकस्मिंश्चक्रे भूपुरादिबिन्द्वन्ता उपर्युपरि नवभूमिकाः तासामधिपतयोपि त्रिपुराचक्रेश्वर्यादिनामानो नवैच। ता अपि नवयोनिष्वेव सूक्ष्मरूपेण तिष्ठन्तीत्याह-चक्रे नवानां महीनामधिनाथा अपि कर्त्र्यो नवयोनीर्दधिरे इति॥ स्योना इति चक्रेश्वरीविशेषणं। सुखहेतुभूता इत्यर्थः। नवमुद्राः संक्षोभिण्यादि योन्यन्ता अपि इहैव स्थिताः। नवभद्रास्तु तन्त्रे विवृताः ''धर्माधर्मौ तथात्मानो मातृमेये तथा प्रपा''। इति। पुण्यं पापं-आत्मा अन्तरात्मा परमात्मा ज्ञानात्मा प्रमाता प्रमेयं प्रमेति नवकं तदर्थः आत्मचतुष्टयस्वरूपविवरणमात्मोपनिषदि द्रष्टव्यं॥ चक्रं नवात्मकमिदं नवधा भिन्नमन्त्रकं। इत्युपबृंहणदर्शनात्। भद्रापदेन मन्त्रा वा ग्राह्याः॥ ते च नवचक्रेश्वरीमन्त्रा इति केचित्। सान्निध्यान्मुद्रामन्त्रा एवेति तु युक्तं। बिन्दुत्रिकोणवसुकोणात्मकचक्रत्रयरूपे संहारचक्र एव सर्वं श्रीचक्रं सूक्ष्मरूपेण तिष्ठतीति तु पिण्डितोर्थः। आपत्कालिकसंक्षिप्तपूजाप्रकारेषु वसुकोणादिबिन्द्वन्तमातृपूजाविधिर्यस्तन्त्रेषूपलभ्यते। तत्रेयमेव श्रूतिर्मूलं॥ अत्रसर्वत्रोपब्रह्मणानि तन्त्रपुराणवचनानि तु विस्तरभयान्न लिख्यन्ते॥

अथ दशारद्वयमन्वश्ररूपं स्थितिचक्रमुपदेष्टुं तृतीयामृचमाह-

एका सा आसीत् प्रथमा सा नवासीत् आसोनविंशत् आसोनत्रिंशत्।
चत्वारिंशदथ तिस्रस्सामिधा उशतीरिव मातरोमाविशन्तु॥३॥

एकासासीदिति आभ्यो नवयोनिभ्यस्सूक्ष्य भूतानि पञ्च, स्थूल भूतानि पञ्चेति भूतदशकमभूत्। तेभ्यः स्थूलसूक्ष्मभेदेन शब्दादितन्मात्रदशकमभूत् तेभ्यश्च कर्मेन्द्रियाणि पञ्च, ज्ञानेन्द्रियाणि पञ्च, अन्तःकरणानि चत्वारि, इति चतुर्दशकमजायत॥

एतास्सर्वा अपि देवताः स्त्रीरूपत्वात् योनिरूपा एव। तदिदं सर्वे ''भूततन्मात्रदशकं प्रकाशालम्बनत्वतः। द्विदशारस्फुरद्रूपं'' इत्यादिना तन्त्रे विवृतम्। सैव प्रक्रिया पूर्वानुवादपूर्वकमिहोपदिश्यते॥

या प्रथमा सर्वजगत्कारणभूता सा एकैव पूर्वमासीत् बिन्दुचक्ररूपा। अथ नवासीत् नवयोन्यात्मना। अथोनविंशत् एकोनविंशतिस्वरूपा आस। नवयोनयोऽन्तर्दशारयोनयश्चेति। विंशदित्यादि छान्दसं। अथोनत्रिंशदास बहिर्दशारयोनीनां मेलनेन। अथ चत्वारिंशत्तिस्रश्च पूर्वासु च

चतुर्दशमेलनेन त्रिचत्वारिंशद्योनिस्वरूपैकैव देवी जातेत्यर्थः। बिन्दुचक्रस्यान्तराकारत्वेन एकासासीदित्यस्य योन्याकृतीनां मध्ये अपरिगणनम्।

समिधा समिद्धा देदीप्यमाना एतामातरोमाविशन्तु मां प्रविशन्तु। मच्छरीरस्थापि श्रीचक्ररूपत्वादिति स्तोत्रकृतः प्रार्थनम्॥

उशतीरिव-कामयमाना इव-वस्तुतो निष्कामत्वात् धेनवोपि वत्ससामीप्यमिच्छन्त्यः वनात् द्रुतं यवागोष्ठं प्रविशन्ति तथा एताः प्रविशन्त्वित्यर्थः। इयमेव श्रुतिः चक्रन्यासविधीनां तन्त्रस्थानां मूलं। एतासामेव देवतानां स्वशरीरे न्यस्तव्यत्वात्। 'योगिन्यो यास्तु तास्सर्वा गेहं कुर्वन्तु मे वपुः'' इति शक्तिन्यासमन्त्रलिंगसंवादात्तस्यापि मूलम्।

अथ सृष्टिचक्रे अवशिष्टे वृत्तत्रयविशिष्ट पद्मद्वयमुपदेष्टुं चतुर्थीमृचामाह ऊर्ध्वज्वलदिति

**ऊर्ध्वज्वलज्ज्वलनज्योतिरग्रेतमो नैतिरश्चीनमजरंतद्रजोऽभूत्।
आनन्दनं मोदनं ज्योतिरिन्दोः एताउवै मण्डलामण्डयन्ति।।४।।**

चतुर्दशारमधोधोहि पद्मे अष्टदळषोडशदलात्मके वर्तेते।। तथोर्ध्व कर्णिकावृत्ते बाह्यवृत्तमेकमेव। त्रीणि वृत्तानीति कतिपयसिद्धान्तः।। अत एव ''ज्येष्ठारूपं चतुष्कोणं वामारूपं भ्रमित्रयं।।'' इत्यत्र भ्रमित्रयपदस्य वृत्तत्रयान्तरालद्वयवर्त्तिपद्मद्वयलक्षकत्वेन प्राचामाचार्याणां व्याख्या युज्यते।।

वृत्तत्रितयंसयुतं सरोरुहद्वयं शाक्तैरग्नीषोमात्कं प्रिये। इति वचनेप्येषैव व्याख्या।। तानि च वृत्तानि अग्निसोमसूर्यगुणत्रयरूपाणि इति प्रकृतायामृचिवर्णनेनैव तदन्तरालपद्मद्वयं वर्णितं वेदितव्यं।।

अक्षरार्थस्तु अग्रे स्थितिचक्रोत्तरचक्रेषु। प्रथमं तमो वै निश्चिततमोगुणात्मकं ज्वलननामकं ज्योतिर्मण्डलमभूत्। ऊर्ध्वज्वलदितिविशेषणेनाग्निज्वालारूपदृढीकारः।। ऊर्ध्वभागे कज्जलदर्शनेन तमोरूपत्वदृढीकारश्च अत एव तेजोमयस्य तमस्त्वोक्तावसांगत्यशंकापरिहारायैव वै इत्यव्ययं। ततः परं तिरश्चीनं तिर्यक् प्रसारिज्योतिर्मण्डलं रक्तत्वाद्रजोगुणमभूत्। तच्च सूर्यरूपं अग्निसूर्ययोरूर्ध्वतिर्यक्प्रसृतेः प्रत्यक्षत्वात्। यदाहुरभियुक्ताः गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।। इति

अजरमिति विशेषणमग्नितो वैलक्षण्यदृढीकाराय। ततो मोदनं वैषयिकसुखोत्पादकं। इन्दोः ज्योतिर्मण्डलमभूत्। अनन्दपदेन सत्त्वगुणात्मकतोक्ता। सत्वाधिवयस्यैव ब्रह्मानन्दाभिव्यञ्जकत्वात्। उ.वै. इति कोमलामन्त्रणे (भैरवयामले)। वै एवकारार्थे वा। एवं त्रीणि मण्डलानि वृत्तानि। एता मातृः मण्डयन्ति शोभावतीः कुर्वते। वृत्तत्रयान्तरालवर्ति कमलयुगलविशिष्टं श्रीचक्रं कार्यक्षमं, न केवलं मन्वश्रान्तमित्यर्थः। मन्वश्रादिबिन्द्वन्तपूजाया आपत्कालिकत्वादिति भावः।।

नवमं भूगृहात्मकं चक्रमुपदेष्टुं पञ्चमीमृचमाह तिस्रश्च रेखा इति।।

**तिस्रश्च रेखास्सदनानि भूमेः त्रिविष्टपा स्त्रिगुणास्त्रिप्रकाशाः।।
एतत्पुरं पूरकं पूरकाणामत्र प्रथेते मदनो मदन्या।।५।।**

तन्त्रान्तरेषु कर्णिकावृत्तद्वयातिरिक्तानि पद्मद्वयाद्बहिः त्रीणि वृत्तानि विहितानि दृश्यन्ते। तत्पक्षे तिस्रश्च रेखा इत्येतावन्मात्रं वृत्तरेखात्रयपरं नेयं। न चैवं सति कर्णिकाद्वयस्यैवावशेषेण मण्डलत्रयकथनासंगतिरिति वाच्यं। तन्त्रराजे मन्वश्राद्बहिर्मर्यादावृत्तस्याष्टदलवृत्तातिरिक्तस्य कथनेनास्याः श्रुतेस्तन्मूलत्वस्योपपत्तेः॥ भूमेस्सदनानि रेखास्तिस्र इति सामानाधिकारण्यं अक्लिष्टोऽर्थः॥

ता एव त्रिविष्टपा भुवनत्रयरूपाः। देवतावासभूमित्वात् स्वर्गरूपा वा। त्रिगुणाः गुणत्रयरूपाः, त्रिप्रकाशाः सूर्यचन्द्राग्निरूपवृत्तत्रयप्रकाशरूपाः॥

श्रीचक्रवर्णनमुपसंहरति एतदिति। सार्धचतुष्टयेन वर्णितं पुरं श्रीपुरमिव सपरिवार परदेवतावासस्थानं चक्रं। पूरकाणां भक्तमनोरथपरिपूरकाणां शिवविष्ण्वादीनामपि पूरकं। मनोरथपरिपूरकं अत्र श्रीचक्रे मदनः शिवकामेश्वरः, मदन्या शिवकामसुन्दरी च प्रथेते स्वमयूखात्काणिमादिनानारूपविस्तारेण विलसत इत्यर्थः॥

मदनी आ इति छेदो वा पुंयोगलक्षणो ङीष्॥ आप्रथेते इत्यन्वयः। छन्दसि परेपि, व्यवहिताश्च, इत्यभ्यनुज्ञानात्। क्षेत्रेषु विविधेषु नामभेदेन यानि देवीरूपाणि पुराणेषु तन्त्रेषु चोपलभ्यन्ते, तानि सर्वाणि अस्या एवेत्युपदेष्टुं षष्ठीमृचमाह॥

मदन्तिका मानिनी मंगला सुभगा च सा सुन्दरी शुद्धिमत्ता।
लज्जामतिस्तुष्टिरिष्टा च पुष्टा लक्ष्मीरुमा ललिता लालपन्ती॥६॥

मदन्तिकेति। पद्मपुराणे देवीतीर्थपरिगणनावसरे कतिपयानि रूपाण्युक्तानि प्रयागे ललितादेवीत्यादि।

लंकायां मंगला नाम त्रिकूटे भद्रसुन्दरी।
करवीरे महालक्ष्मीरुमादेवी विनायके॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले।
तुष्टिर्वत्सेश्वरे तथा इत्यादीनि अन्यान्यपि रूपाणि तत्र तत्रान्वेष्याणि॥

मदन्तिकेत्यादि चतुर्दशकं, वाराणस्यां विशालाक्षीत्यादीनामुपलक्षणं। यदेव किंचिद्देवीरूपं तेन लालप्यमानापि सैवेत्यर्थः।। लालपन्तीपदं लालप्यमानापरं ।।

प्रातिपदिकादुच्चरन्ती विभक्तिः प्रातिपदिकार्थे विशेषक इत्याहेति शाबरभाष्ये प्रयोगदर्शनात्। अथवा पञ्चदशाक्षरणां पञ्चदशेमादेवताः।। शुद्धिमत्तेत्यत्र सिद्धिमित्याथर्वणपाठः।।

एवं वर्णिताया देवताया उपास्तिं विधातु सप्तमीमृचमाह इमां विज्ञायेत्यादि।।

इमां विज्ञाय सुधया मदन्ति परिस्रुता तर्पयन्तः स्वपीठम्।
नाकस्य पृष्ठे महतो वसन्ति परं धाम त्रैपुरं चाविशन्ति।।७।।

इमां पूर्वोक्तां परदेवतां विज्ञाय, विधिविशेषपूर्वकं ज्ञात्वा गुरूपसदनदीक्षादिपूर्वकमुपास्तिं गृहीत्वा-स्वीकृत्य, स्वपीठं-स्वशरीराभिन्नं श्रीचक्रं, तत्र देवतां सावरणां सुधया परिस्रुता-पीयूषीकृतेन द्रव्येण, तर्पयन्तः - तर्पणाद्युपचारैः पूजयन्तो, ये मदन्ति-विषयभानप्रमोषपूर्वकं स्वात्मैकविषयकनिर्विकल्पकवृत्तिभाजो भवन्ति।

ते महतो नाकस्य पृष्ठे वसन्ति, त्रैपुरं परं धाम आविशान्ति चेत्यर्थः। अमृतीकरणं संस्कारान्तराणामुपलक्षणं तदभिमानिदेवतायास्सुधादेवीति संविच्च संस्कारमन्त्रवर्णादेव गम्यते "मन्त्रसंस्कारसंशुद्धं देवतामृतमुच्यते।।" इति रुद्रयामलं च महानाकपृष्ठवासः त्रिविधपुरुषार्थफलोपलक्षकः। त्रिपुरायाः परं धाम तु मुक्तोपसृप्यं स्वरूपं, तेन मोक्ष उच्यते, सर्वान्कामान्मोक्षं चाप्नुवन्तीति भावः।। एवं सर्वगता शक्तिस्सा ब्रह्मेति विविच्यते।

> सगुणा निर्गुणा चेति द्विविधोक्ता मनीषिभिः।
> सगुणारागिभिस्सेव्या निर्गुणा तु विरागिभिः।।
> धर्मार्थकाममोक्षाणां स्वामिनी सा निराकुला।
> ददाति वाञ्छितानर्थानर्चिता विधिपूर्वकं।।

इति देवीभागवतेपि स्मरणात्। श्रीविद्यादीक्षितो द्रव्यवता स्वपीठार्चनेन निर्विकल्पकवृत्तिद्वारा सर्वान्कामान्भावयेदिति भावनाविशिष्टभावनान्तविधिः पर्यवस्यति ।।

सर्वथा मतिमान् दीक्षेत इत्यादि कल्पसूत्रादिगतविशेषणविधीनामियमेव श्रुतिर्मूलं। विज्ञाय तर्पयन्त इत्यधिकारिविशेषण त्वेन श्रुतमपि तर्पणं फलभावनाकरणत्वेन संबध्यते "हिरण्यदा अमृतत्वं भजन्ते" इति वदप्राप्तार्थकत्वाद्विधिशक्तिप्रविबन्धाभावाच्च मन्त्रत्वेपि न विधित्वव्याघातः। "वसन्ताय कपिञ्जलानालभेत-प्रणीयादीन्नाथमाना यतव्यान्। आस्यजानन्तो नामचिद्विवक्तन" इत्यादि मन्त्राणामपि बहुशो विधित्वस्वीकारात्, वस्तुतो मदन्तीत्यस्य यदाग्नेयवाक्य इव लेट्त्वकल्यनया भावार्थाधिकरणन्यायेन चिद्देव्यभिन्नस्वात्ममात्रविषयकवृत्तिविशेष-वाचकमदधात्वार्थस्यैव करणत्वं ॥

अन्तर्यागपदवाच्यतापि तस्यैव, यजतेः वृत्तिविशेषवाचकत्वात् परिस्रुतेति तु मत्वर्थलक्षणया धात्वर्थेनान्वेति भावनान्वितयोरुभयोररुणैकहायनीन्यायेन वा पार्ष्टिकान्वयः। प्रतितिष्ठन्तीत्यस्येव नाकस्य पृष्ठ इत्यादेर्भाव्यसमर्पकत्वं, चकारेण फलसमुच्चयकथनात्, "पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवति" इत्यत्रेव संवलिताधिकारत्वं, अनेकेषा पुरुषार्थानां व्यासज्यवृत्तिफलत्वं इति यावत्॥ न पुनस्सर्वेभ्यः कामेभ्य इत्यत्रेव प्रत्येकपर्याप्तिं तर्पणन्तु फलवद्फलन्यायेनांगं। इमां विज्ञायेति तु विद्वत्ताधिकारितावच्छेदको धर्मः। अतएव

कुलदीक्षाविहीनानां नाधिकारो द्विजन्मनां

इति समयाचारस्मृतिरुपपद्यते ॥

इह तर्पयन्त इति बहिर्यागविधौ वक्ष्यमाणे निवेदयन् स्वात्मीकृत्येति विधौ च शतृ ल्यप् प्रत्ययाभ्यां देवतानिवेदनस्वात्मीकरणयोस्समानकालिकत्व-कथनात् दिव्यपानविधावेव श्रुतिस्वारस्यं, न वीरपानविधौ, तेन

> पानन्तु त्रिविधं प्रोक्तं दिव्यवीर पशुक्रमैः।
> दिव्यं देव्यग्रतः पानं वीरमुद्रासने कृतम्॥

इति स्मृतेर्मूलश्रुत्यन्तरमन्वेष्यं। पुरुषार्थनिषेधास्तु रागप्राप्तैकविषयकत्वात् क्रत्वर्थत्वेन विहितेषु न प्रवर्तन्त एव॥

> येन केनाप्युपायेन शिवे चित्तं निवेशयेत्।
> तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्॥

इत्यादिपौराणवचसां ईदृशाशय एव स्वारस्यात् स्पष्टानां तत्र वचसां क्रत्वर्थतया सर्ववर्णोद्देशेन विधायकानां बहुलमुपलंभात्, तेषाञ्चेदृशानेकप्रत्यक्षश्रुतिमूलकत्वेन बलाबलचिन्तानवकाशादिति दिक्॥

एवं पररूपोपास्तिं विधाय, सूक्ष्मरूपोपास्तिविधित्सया अष्टमीमृचमाह।

कामो योनिः कमलावज्रपाणिर्गुहाहसामातरिश्वाभ्रमिन्द्रः।
पुनर्गुहासकलामाययाच पुरूच्येषा विश्वमाताऽदिविद्या॥

The mnemonie form of the Kādi-vidyā (of 15 letters):

क ए ई ल ह्रीं।
ह स क ह ल ह्रीं।
स क ल ह्रीं॥
(कादिविद्या)

कामोयोनिरिति॥ इह पञ्चदशाक्षरो मन्त्र उधृद्रियते। स च स्त्रीदेवत्यत्वाच्चिद्रूपत्वाच्च विद्यापदेनोच्यते॥ तादृश्यपि वेदमाता गायत्री कण्ठरवेण पठ्यते। अस्य तु प्रत्यक्षरं तद्वाचकपदमन्तेरण कतिपयानां निर्देशादतिरहस्यत्वं मन्त्रस्य, तद्द्वारा तदधिकारिककर्मणां च तथात्वं ध्वनितं। किं बहुना गायत्र्यप्यादिविद्योद्धारिकैवेति त्रिपुरातापिन्या स्पष्टं प्रदर्श्यते, भागवतप्रथमश्लोकोऽपि एवमेवोपबृंहयति-

सर्वचैतन्यरूपान्तामाद्यांविद्यां च धीमहि, बुद्धिं या नः प्रचोदयात् इति॥

अतिरहस्यत्वादेव नाथ-चरणैकावगमनीयोयं मन्त्रः। मातरिश्वा कामश्चचतुर्मुखवाचकमक्षरं, कमलायोनी चतुर्थैकादशस्वरो, इन्द्रवज्रपाणी तृतीयमन्तस्थाक्षरं गहामाये भुवनेश्वरीबीजंह्रीं, अभ्रं तस्या एवाद्यमक्षरं हकारः, शेषपञ्चकं स्वरूपं, एषा आदिविद्या पुरूची पुरातनी, विश्वमाता जगज्जनयित्री विद्याक्षरैर्जगदुत्पत्तेर्योगिनीहृदये सम्प्रदायार्थप्रकरणे सविस्तरं वर्णनात्॥

मन्त्रार्थस्तु दत्तात्रेयागस्त्यादिर्भिबहुभिस्तन्त्रभेदेन बहुधोक्तः। स चास्माभिर्वरिवस्यारहस्ये यथामति संगृह्य दर्शित इति तत एवावगन्तव्यम्॥

कामराजोपासितां विद्यामुपदिश्य लोपामुद्रोपासितां विद्यामुपदेष्टुं नवमीमृचमाह षष्ठसप्तममिति॥

षष्ठं सप्तममथ वह्निसारथिमस्या मूलत्रिकमादेशयन्तः कथ्यं कविं कल्पकं काममीशं तुष्टुवांसोऽमृतत्वं भजन्ते॥९॥

(हादिविद्या)

अस्या एव विद्याया मूलत्रिकं प्राथमिकमक्षरत्रयमुन्मूल्येति शेषः। तत्स्थानेऽपि षष्ठादिवर्णत्रयमेव निवेशयन्तो जापकाविद्याद्वयान्यतरेण ईशं शुद्धसत्त्वोपाधिकं परशिवं, तुष्टुवांसः स्तुवन्तः, जपन्तः अमृतत्वं भजन्ते विद्यानजपेन मोक्षं भावयेदित्यर्थः॥ ईशं विशिनष्टि कामं, सोऽकामयत बहुस्यां प्रजायेयेति श्रुतिप्रतिपाद्यात्वेनेक्षत्यधिकरणे निर्णीतं॥ कल्पकं जगत्कल्पनाधिष्ठानं जन्माद्यधिकरणोक्तं॥ कविं वेदप्रणेतारं॥ कथ्यं वेदवेद्यं॥ शास्त्रयोनित्वाधिकरणे वर्णकद्वयेनोक्तं, परं ब्रह्मैवेति तु विशेषणसमर्पितोर्थः। अजरापुराणेत्यादिभिर्ब्रह्मलिंगैः, इह पुंलिंगैः, वक्ष्यमाणकामकलाध्यानगतस्त्रीलिंगैश्च परदेवतायास्त्रिविधं ध्यानं विहितं भवति॥ तथाचोपबृंहितं कुलार्णवे

पुंरूपं वा स्मरेद्देवीं स्त्रीरूपं वा विचिन्तयेत्।
अथवा निष्कलं ध्यायेत्सच्चिदानन्दलक्षणं॥

इति॥ यद्यपि परोपास्तौ निष्कलं, जपे पुंरूपं, बहिर्यागे स्त्रीरूपं, ध्येयमिति व्यवस्थापि सुवचा॥ तथापि स्त्रीपुंसयोः समप्राधान्यस्य वक्ष्यमाणात्वात् सम्प्रदायाच्चैच्छिक एव विकल्पः॥ मनुचन्द्राद्युपासिताविद्यानां अन्यासामपि त्रिपुरातापिन्यामुद्धारदर्शनेपि प्रकृते द्वयोरेवोद्धारः तास्वनयोराधिक्यध्वननार्थः। अत एव ज्ञानार्णवे द्वादशविधविद्या उद्धृत्य

विद्याद्वयमिदं भद्रे देवानामपि दुर्लभम्॥

इत्यादिनोपबृंहितं ॥

अनयोरपि मध्ये कादिविद्याया एव प्रथममुद्धारादाधिक्यध्वनिः अत एव

श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथापरा।

इति ब्रह्माण्डोपबृंहणं॥ वस्तुतस्सर्वासां विद्यानामभेदात् तारतम्योक्तिः प्रशंसामात्रमिति समर्थितं सेतुबन्धग्रन्थे अस्माभिः॥ अत एव श्रीमदाचार्यभगवत्पादैः वैपरीत्येनानयोरुद्धारः प्रदर्शितः सौन्दर्यलहर्यां। तत्रापि प्रकृतश्रुत्यानुगुण्याय शिवशक्तिकामपदानां अन्यथा व्याख्यानं कतिपयानां क्लिष्टत्वान्निरर्थकत्वाच्च नादर्त्तव्यं॥

अत्रान्तर्यागस्यैव प्रकरणत्वेन तदीयद्रव्यानुवादेन गुणान्तरसमुच्चयस्य द्वादश्यामृचि विधास्यमानत्वेन प्रकरणानुवृत्तेर्वक्तव्यतया तन्मध्यपतितस्य जपस्य प्रकरण्यन्तर्यागांगत्वात् अमृतत्वं भजन्ते इति अपापश्लोकश्रवणवत् अर्थवादः॥

मन्त्रेऽपि विधित्वस्येवार्थवादत्वस्यापि स्वीकारे बाधकाभावात्। तिस्रः पुर इत्यादेस्तु अन्तर्यागविधिशेषत्वेऽपि नार्थवादत्वं॥

विधिशेषत्वस्यार्थवादत्वव्याप्यत्वे मानाभावादर्थवादत्वेपि वा भूतार्थवादत्वेन स्वार्थे प्रामाण्याच्च, न च द्वादश्यामृचि स्थूलोपास्तिर्भिन्नैव बहिर्यागरूपा विधीयत इति वाच्यं॥ तथापि पञ्चदश्यामृचिमदधात्वर्थविवरणेनोपसंहारदर्शनात् प्रकरणानुवृत्तेर्दुर्वारत्वात् ॥ वस्तुत उपास्तित्रयस्य समप्राधान्यमेव॥ विधित्रयेपि फलश्रवणेनान्यतमस्य प्रकरणत्वकल्पने विनिगमनाविरहात्॥ आग्नेययादिषट्कस्येव मिलित्वानामेव च फलजनकत्वं,

अन्तर्यागबहिर्यागौ गृहस्थस्सर्वदाऽचरेत्।
चक्रराजार्चनं देव्या जपो नाम्नाञ्च कीर्तनं॥
भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः॥

इत्यादि वचनात्॥ अधिकारिविशेषेण केवलान्तर्यागजपयोः फलजनकत्वं तु वचनात्। असोमयाजिनोग्नीषोमीयपुरोडाशसाहित्याभावेपि फलसिद्धिवदित्यादिकं न्यायविद्भिरूह्यम् ॥

इतिनवमी ऋक्। अथ स्थूलोपास्ति धित्सया मूलदेवताया अन्तस्सगुणत्वेन चिन्तितायाः बहिश्चक्रे स्थापनाय स्थूलरूपविशेषं निर्देष्टुं दशमीमृचमाह॥

त्रिविष्टपं त्रिमुखं विश्वमातुर्नवरेखाऽस्वरमध्यं तदीळे॥
बृहत्तिथीर्दशपञ्चादिनित्या सा षोडशीपुरमध्यं विभर्ति॥
(स्थूलोपास्तिः)

त्रिविष्टपमिति॥ रेखापदोत्तरं षोडशस्य विसर्गस्वरस्य प्रश्लेषः। नवरेखासु-नवयोनिघटिकासु, अः इति स्वरस्थानीयो मध्यो यस्य तत्, यद्वा नवसंख्यारेखा यस्य तत् नवरेखं संहारचक्रं तस्य अस्स्वरोपलक्षितं स्थानं मध्यं यस्य तत्, अः इत्याकार एव स्वरो यस्मिंस्तत् अः स्वरमिति वा विग्रहः तादृशं त्रिमुखं-त्रिकोणं, मध्यत्रिकोणमितियावत् तत् विश्वमातुस्त्रिपुरसुन्दर्या स्त्रिविष्टपं-निवासस्थानं, पूजास्थानमितियावत्॥

स्वर्गस्य देवतावासभूतत्वेन तद्वाचकपदेनात्र स्थाननिर्देशः॥

तदीळे-इति स्तोतुर्वाक्यं द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते॥ स डकारो ळकारः। इति प्रातिशाख्यविधितो डकारस्य ळकारः संजातः इयमेवोपनिषदाथर्वणैरपि पठ्यते। तत्पक्षे न दुस्स्पृष्टादेशः इति व्यवस्था। अस्स्वरस्य मध्यमत्वोक्त्यैव इतरेषां पञ्चदशस्वराणां रेखात्रये बिन्दुमभितः समं स्यादश्रुतत्वादिति न्यायेन पञ्च पञ्चधा विभज्यावस्थानं ध्वनितं॥ तत्त्रिकोणे बृहत्, विभावितं सत् दशपञ्चतिथीः दशपञ्चतिथिदेवताः नित्याः कामेश्वर्यादिचित्रान्ताः विभर्ति-दक्षिणोर्ध्वोत्तररेखासु स्वस्वस्थाने पञ्चपञ्चनित्याः पूजनीयाः इति भावः। तदुपबृंहितं ज्ञानार्णवे,

विभाव्य च महात्र्यस्रमग्रदक्षोत्तरक्रमात्।
रेखासु विलिखेत्पश्चात् पञ्च पञ्चक्रमेणाह॥
अकाराद्यानुकारान्तान् दक्षिणायां विचिन्तयेत्।
ततश्च पूर्वरेखायां दीर्घकर्णादीर्घकर्णादिपञ्चकम्॥
विलिख्योत्तररेखायां शक्त्यादिविलिखेत्ततः।
अनुस्वारान्तमध्ये च विसर्गे षोडशीं यजेत्॥ इति॥

चन्द्रस्य कलावृद्धिक्षयशालिन्यः पञ्चदश ता एव हि तिथयः

दर्शाद्याः पूर्णिमान्ताश्च कलाः पञ्चदशैव तु॥

इत्यादिना तन्त्रे निर्दिष्टाः। दर्शादृष्टादर्शता इत्यादिना तैत्तिरीयैराम्नाताश्च। एतासां कारणभूता वृद्धिक्षयशून्या सादाख्या षोडशी कला॥

सा च पञ्चदशानां नित्यानां कारणत्वादादिनित्येत्युच्यते। सा पूर्वं वर्णिता त्रिपुरसुन्दरी आदिनित्यास्वरूपा सती पुरस्य श्रीचक्रस्य मध्ये, विसर्गस्वरस्थानं बिभर्ति-अध्यास्ते। प्रकाशविमर्शरूपाकारहकारव्यञ्जकत्वात् षोडशस्वरस्य तदात्मकताया युक्तत्वादिति द्रष्टव्यम्॥

प्रसंगात्काम्यं कामकलाध्यानं बहिर्यागाश्रितमुपदेष्टुं एकादशीमृचमाह॥

द्वामण्डला द्वास्तना, बिम्बमेकं मुखं, चाधरत्रीणि गुहासदनानि॥
कामीं कलां काम्यरूपां विदित्वा नरो जायते कामरूपश्च काम्यः॥

(कामकलाध्यानम्)

द्वामण्डलेति। द्वौ मण्डलौ द्वौ स्तनौ। एकं बिंबं, मुखं। त्रीणि सदनानि भूगृहाणि। गृहा-हकारार्धरूपा। यद्यपि बिंबोऽस्त्रीमण्डलं त्रिष्विति कोशेन बिंबपदस्यापि मण्डलवाचकत्वेन चतुर्थ्यामृचि वर्णितानां त्रयाणां मण्डलानामेवैष विभागः। तत्रापि वह्निसूर्यमण्डलावेव स्तनौ बिंबपदस्वारस्यात्, पाठक्रमात् तदधस्तनमेव भूपुरं हकारार्थं इति स्पष्टं प्रतीयते। सन्ति व्यक्तं तान्यपि कामकलारूपाणि बहुविधानि तन्त्रेषु तत्र तत्र निर्दिष्टानि। तथापि भगवत्पादैः (सौन्दर्यलहर्याम्),

> मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य तदधो।
> हरार्धं ध्यायेत्॥
> इत्युपबृंहणात्॥

अर्थक्रमेण पाठक्रमबाधात् बिम्बपदं बिन्दुपरं सत् बिन्द्वादिमन्वश्रान्तचक्रगणपरम्॥

> मण्डलत्रयरूपन्तु चक्रं शक्त्यनलात्मकं॥

इति सुन्दरीश्लोके (योगिनीहृदये) मण्डलपदस्य दशारादिचक्रपरेत्वनापि व्याख्यानदर्शनात्, बिन्द्वादिमण्डलानां षण्णां एकावयवित्वेन विभावनाय एकमिति पदं॥

द्वामण्डलेत्यष्टदळषोडशदळचक्रद्वयपरं, इति योज्यं॥

इदमवयवत्रयकथनं सर्वावयवोपलक्षणं। वस्तुतश्शरीरेऽपि त्रय एवावयवाः शीर्षादिघण्टिकान्त):, कण्ठादिस्तनान्तः, हृदयादि सीविन्यन्तश्च, केशपाणिपादन्तु तत्तच्छाखा इति। एवं सर्वचक्रात्मना परिणतां, कामीं, कामेश्वरात्मकमन्मथसम्बन्धिनीं कलां, चित्कलां। काम्यरूपां कमनीयस्वरूपां, विदित्वा ध्यात्वा॥ नरः उपासकः, कामरूपो मन्मथसुन्दरः सद्यः सकलवनिताक्षोभकरो जायते॥ अत्यल्पमिदमुच्यत इत्याह काम्य इति अविशेषेण श्रवणात् त्रिभुवनान्तर्वर्तिसकलजनैरभि-लषणीयस्वरूपश्च भवति। तदुक्तं भगवत्पादैः

ध्यायेद्यो हरमहिषि ते मन्मथकलां॥ स सद्यस्संक्षोभंनयति वनिता
इत्यतिलघु त्रिलोकीमप्याशु भ्रमयति रवीन्दुस्तनयुगां॥

इति॥ कामरूपत्वकाम्यत्वकामः कामकलां ध्यायेदिति गुणफलसंबन्धविधिः। अत्र फलार्यतया बिधेयस्य ध्यानस्य स्वतः क्रियारूपस्यश्रयान्तरानपेक्षतया श्येनक्रत्वादेस्सौमिकांगसंवलितत्वस्येव बहिर्यागांगसंवलितत्वस्याप्यभावेन बहिर्यागाद्बहिरप्यनुष्ठानात् फलमिति तु भगवत्पादाशयः।

बिन्दुं संकल्प्य वक्त्रन्तु तदधस्थं कुचद्वयं।
तदधस्सपरार्धन्तु चिन्तयेत्तदघोमुखं॥

इति नित्याषोडशिकार्णवे ॥

क्रतुप्रकरणस्थविधिनाऽस्य ध्यानस्य क्रत्वर्थत्वमपि स्मर्यत इति चेत् किन्तावता अन्नाद्यकामनाफलकावेष्टेरिव फलार्थिनो बहिः प्रयोगस्याप्यक्षतत्वात्, अत एव भगवत्स्मरणमुपक्रम्योक्तं शाण्डिल्यभक्तिसूत्रे। बहिरन्तरस्थमुभयमवेष्टि सववदिति॥

बहिर्यागद्रव्याणि बहिर्यागद्रव्यप्रतिपत्तिश्च विधातुं द्वादशीमृचमाह॥

परिस्रुतं झषमाद्यं पलं च भक्तानि योनीः सुपरिष्कृतानि ॥
निवेद्य देवतायै महत्यै स्वात्मीकृत्य सुकृती सिद्धिमेति॥१२॥

(बहिर्यागक्रमः)

षरिस्रुतमिति ॥ झषो मत्स्यः। पलं मांसं, तस्य झषत्याद्यं परिस्रुतम्, प्रथमस्योत्तरं द्वितीयमित्यर्थः। तेन झषस्तृतीयः भक्तानि, वटकचणकादि मुद्राद्यात्मकानि नानाविधान्यन्नानि ॥

चतुर्थं योनिपदं कुण्डगोळोद्भवोपलक्षणं तत्पञ्चमं। योनीरिति बहुवचनन्तु ब्राह्मणक्षत्रियादि कतिपयजातिभेदाभिप्रायं॥ तदुपबृंहणं कलाष्टकादिपदेन तन्त्रेषु द्रष्टव्यं। चकारः पञ्चानां समुच्चयपरः।

पलस्य झषोत्तरं पठितस्यापि झषात्पूर्वं आद्यापदेन निवेशात् मकाराणां क्रमो विवक्षितो ध्वन्यते। तेन मुख्यालाभे प्रतिनिधिभिरर्चनस्य न्यायेन मपञ्चकालाभेऽपि नित्यक्रमप्रत्यवमृष्टिः इति॥

कल्पसूत्रेण च सिद्धत्वेऽपि पूर्वपूर्वालाभे सति नोत्तरोत्तरस्य मुख्यस्य लाभेऽपि ग्रहणमिति द्योतितं ॥ प्रथममात्रालाभेऽपि चतुर्थस्य नैवेद्यार्थमावश्यकत्वात् तावन्मात्रग्रहणं सम्प्रदायलभ्यम् ॥

आज्यमिति शाखान्तरीयपाठे घृतमेवार्थः। तत्र पक्वमित्यर्थेन तत् काकाक्षिगोळकन्यायेनोभयोर्विशेषणं। अजसम्बन्धीति व्याख्यातुं न युक्ता तन्त्रे विकारार्थकस्य दर्शनात् सूत्रोक्तानां पञ्चत्वादीनां परिसंख्यापत्तेश्च परदेवतातर्पणमात्रपर्याप्तमात्रस्य लाभेऽपि न प्रतिनिधिनायागः ॥ बहिर्यागे स्वात्मीकारस्य प्रतिपत्तित्वेन तल्लेपेऽपि बाधाकाभावादित्यादिकन्तु षाष्ठन्यायसिद्धमूहनीयं ॥ सुपरिष्कृतानि दृष्टादृष्टसंस्कारैस्संस्कृतानि ते च पाकादिरूपालौकिकाः शापमोचनादिरूपा वैदिकाश्च बहवस्तन्त्रेषु प्रसिद्धाः॥

बह्वल्पं वा स्वगृहयात्तमिति न्यायेन

कल्पसूत्रोक्तमात्रा वा।

महत्यै देवतायै महादेव्यै निवेदयन् यजन्॥ सुकृती बहिर्यागकर्ता। तानि स्वात्मीकृत्य स्वयमपि भक्षयित्वा। सिद्धिं यागफलं एति प्राप्नोति परस्परसमुच्चितप्रथमादि मपञ्चकवता यागेन महादेवीदेवताकेनेष्टसिद्धिं भावयेदिति विधिपर्यवासानादिप्रकारोन्तर्याग-विधिवदेव द्रष्टव्यः ॥

देवतायास्सगुणध्यानं क्रत्वंगमुपदेष्टुं त्रयोदशीं ऋचमाह॥

सृण्ये वसितया विश्वचर्षणिः पाशेन प्रतिबध्नात्यभीकान्।। इषुभिः पञ्चभिर्धनुषा च विध्यत्यादिशक्तिररुणा विश्वजन्या।।१३।।

(सगुणध्यानलमू)

सृण्येवसितयेति। इत्थंभूतलक्षणे तृतीया। सितया श्वेतया रजतमय्या सशयोरभेदान्निशितया तीक्ष्णधारया वा। सृण्या अङ्कुशेन। इवोपलक्षिता विश्वजन्या, विश्वं जन्यं यस्यास्सा विश्वजगज्जननी अरुणा, लौहित्यवती शुभाशुभकर्मद्रष्ट्री सती। अभीकान् कामुकान्, तृष्णया, लौल्यैनेह मार्गे प्रवर्तमानान्भ्रष्टान्। पाशेन प्रतिबध्नाति पाशेन तान्बध्वा धनुषा पञ्चभिरिषुभिः बाणैर्विध्यति च अधःपातयतीति यावत्। तृष्णाहीनान्वैधदिया प्रवर्तमानान् ऊर्ध्वं नयतीति तु विधिसिद्धमेवेति पुनर्नोक्तं।।

तदुक्तम्-

विधिबध्यैव सेवेत तृष्णया चेत्स पातकी।
यैरेव पतनं द्रव्यैर्मुक्तिस्तैरेव चोदिता।
अभीकस्यानभीकस्येत्येवमेते व्यवस्थिताः।।

इत्यादि। सृण्येवेति द्विविधा सृणिर्भवति भर्ता च हन्ताचेति तु यास्कः। इव शब्दस्सर्वत्रान्वितस्सन् सगुणरूपस्य भक्तानुग्रहार्थं कल्पितत्वेन निर्गुणरूपस्यैव पारमार्थिकत्वं व्यजयति।। सगुणस्य कल्पितत्वादेव निर्गुणरूपस्यैव पारमार्थिकत्वं व्यंजयति।।

सगुणस्य कल्पितत्वादेव स्त्रीपुंसयोस्समप्राधान्यमुपदेष्टुं चतुर्दशीमृचमाह भगश्शक्तिरिति।।

भगश्शक्तिर्भगवान्काम ईश उभादाताराविहसौभगानां॥
समप्रधानौसमसत्वौ समो तयोस्समशाक्तिरजरा विश्वयोनिः॥१४॥

(स्त्रीपुंभेदसगुणध्यानम्)

> भगो विमर्शपर्यायः,
> ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः
> ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा॥

इत्यादि स्मृतिभिः ईश्वरत्वशरीरघटको यावन्धर्मराशिः स सर्वोऽपि भगपदेनेह निर्दिष्टः। तादृशो धर्मसमूह एव शक्तिरित्युच्यते।. उपास्यत्वेन वर्णितायाः स्त्रीरूपाया देवताया इदं स्वरूपं॥ तदुक्तं, नागानन्दसूत्रे,

> प्रकाशात्मनो ब्रह्मणः स्वभावात्मकविमर्शं प्रक्रम्य, एष एव विमर्शश्चितिश्चैतन्यमात्मा स्वरसोदिता परा वाक् स्वातन्त्र्यं परमात्मौन्मुख्यमैश्वर्यं सतत्वं सत्ता स्फुरत्ता सारो मातृका मालिनी हृदयमूर्मिः स्वसंवित्स्पन्दः॥

इत्यादिशब्दैरागमैरुद्घ्युष्यते इति॥ एतेषां धर्मविशेषाणां विवरणं तद्भाष्य एव द्रष्टव्यं॥ भगवान् तादृशधर्मसमूहविशिष्ट एव। काम ईशः कामेश्वरः इदमेवोपास्यदेवतायाः पुमात्मकं रूपं। इहोपासनायां सौभगानां धर्मार्थकामरूपाणां विविधफलानां दातारौ उभावपि एकस्या एव देवताया द्वेधापि सगुणध्याने त्रिवर्गसिद्धिरित्यर्थः॥

समप्रधानौ समसत्त्वौ॥ सत्त्वशब्दो गुणपरः तेन परस्परगुणगुणिभावापन्नावित्यर्थः। कामेश्वर्याः कामेश्वराङ्कनिलयत्वेन ध्याने, शिव आधारत्वाद्गुणः शक्तिः प्रधानं, शिवस्यार्धाम्बिकासमायुक्तत्वेन ध्याने, करशीर्षाद्यवयवविशेषरूपत्वात् शक्तिर्गुणाः, शिव एव प्रधानमितिभावः। एवमभिमतफलदान-सामर्थ्यस्यान्योन्यगुणप्रधानभावस्य च साम्येऽपि जगत्कर्तृत्वांशः शक्तिनिष्ठ एव तेन स्त्रीरूपध्यानेनैव शीघ्रं फलसिद्धिरिति ध्वनयन्नाह समोतयोरिति सम्यक्परस्पराभेदेन ओतयोर्मिलितयोरर्धनारीश्वर-रूपयोश्शिवशक्त्योर्मध्ये समशक्तिः सर्वशक्तिः निखिलधर्मसमूहात्मिका देव्येव विश्वयोनिर्जगत्कर्त्री। तथा च शक्तिसूत्रं चितिःस्वतन्त्रा विश्वसिद्धिहेतुरिति। समशब्दः उरुष्याणो अघा यतः समस्तात् इत्यादौ प्रसिद्धः सर्वपर्यायः।

अजरेति विश्वयोनित्वांशे विशेषणं जगत्कर्तृत्वं प्रत्यक्षादिप्रमाणसिद्धत्वेन शङ्काकलङ्कराहित्या-दृतमित्यर्थः। तदुक्तं भागवते

शक्तिः करोति ब्रह्माण्डं सा वै पालयतेऽखिलं।
इच्छया संहरत्येषा जगदेतच्चराचरं।
न विष्णुर्न हरो नेन्द्रो न ब्रह्मा न च पावकः।
नार्को न वरुणश्शक्ताः स्वे स्वे कार्ये कथञ्चन॥

तया युक्ता हि कुर्वन्ति स्वानि कार्याणि ते सुराः।
कारणं सैव कार्येषु प्रत्यक्षेणवगम्यते॥ इति॥
अन्यत्रापि शिवोऽपि शवतां याति कुण्डलिन्या विवर्जितः।
शक्तिहीनोऽपि यः कश्चिदसमर्थः स्मृतो बुधैः॥

इत्यादि विशेषस्सेतुबन्धे द्रष्टव्यः। तेन शिवस्य विद्यमानमपि फलदातृत्वादिकं शक्त्यधीनत्वाद्विळम्बितम्। शक्तेस्तु निरपेक्षत्वादविळंबितं इति शीघ्रसिद्धिकामैः स्त्रीरूपेव देवता ध्यातुं युक्तेति भावः। एवं सगुणध्वानमुक्त्वा, निर्गुणध्याने वक्तव्यांशाभावात्तज्जन्यफलं तज्जननप्रणालिकाञ्चोपदेष्टुं पञ्चदशीमृचमीह परिस्रुतेति॥

परिस्रुताहविषापावितेन प्रसंकोचे गलिते वैमनस्तः॥
सर्वः सर्वस्य जगतो विधाता भर्ता हर्ता विश्वरूपत्वमेति॥१५॥

(निर्गुणोपासनाफलम्)

कर्ममार्गज्ञानमार्गभक्तिमार्गेषु तत्तच्छास्त्रप्रवर्तकैः प्रणालिका नानाविधाः परस्परविलक्षणा उक्ताः। तास्सर्वा अपि दुस्साधाश्चिरकालफलप्रदा इति तु तत्तच्छास्त्रविदां स्पष्टमेव॥ अत्र तु द्रव्यस्वीकारैरावर्त्यमानैरुल्लासपरम्परैव प्रणाळिका। तत्र प्रौढोल्लासपर्यन्तं समयाचारिकृता धर्माः, तदन्तोल्लासे यथाकाम्यं, चरमोल्लासे ब्रह्मस्वरूपतेति॥

तथा च कल्पसूत्रम्, आरम्भतरुणयौवन प्रौढतदन्तो न्मनाऽनवस्थोल्लासेषु प्रौढान्तं समयाचारः। ततः परं यथाकाममिति। उल्लाससप्तकलक्षणानि कुलार्णवादिषु द्रष्टव्यानि। यद्यपि प्रतिदिनं

सुषुप्तिदशायां ब्रह्मस्वरूपतावाप्तिर्जायत एव। तदानीं मनसो विलीनत्वात्, तथाप्यविद्यापरिणामविशेषरूपया निद्रया संवलितत्वान्न सा पुरुषार्थः। निद्राराहित्येन तादृशी दशा तु पुरुषार्थ एव। यां ज्ञानभूमिकासु सप्तमीं मन्यन्ते ज्ञानिनः। याञ्च निर्विकल्पकसमाधित्वेन व्यवहरन्तो नुभवन्ति योगिनः सैवोन्मनोत्तरानवस्थोल्लासेपि योगिभिरनुभूयते, तदुक्तं,

आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितं।
तस्याभिव्यञ्जकं द्रव्यं योगिभिस्तेन पीयते॥

इति।

कल्पसूत्रे तु - तस्याभिव्यंजकाः पञ्च मकारा इत्युक्तम्॥

परन्तु तदेव द्रव्यमयज्ञांगञ्चेदपवित्रं पीतं तदा पुरुषार्थनिषेधप्रवृत्या पापेन प्रतिबद्धं न तां दशामुत्पादयितुं क्षमं, मन्त्रैः पावितं हवीरूपमेव तु समाधिदशामुत्पादयति। तदुक्तं समयाचारस्मृतौ।

असंस्कृतं पशोः पानं कलहोद्वेगपापकृत्।
मन्त्रपूजाविहीनं यत्पशुपानं तदेव हि॥
पशुपानविधौ पीत्वा वीरोऽपि नरकं व्रजेत्।
संस्कृतं बोधजनकं प्रायश्चित्तं च शुद्धिकृत्॥
मन्त्राणां स्फुरणन्तेन महापातकनाशनम्।
आयुः श्रीः कान्तिसौभाग्यं ज्ञानं संस्कृतपानतः॥
अष्टैश्वर्यं खेचरत्वं पतनं विधिवर्जितं।
सौत्रामण्यां कुलाचारे मदिरां ब्राह्मणः पिबेत्।
अन्यत्र ब्राह्मणः पीत्वा प्रायश्चित्तं समाचरेत्॥ इत्यादि। परन्तु
वरं प्राणाः प्रगच्छन्तु ब्राह्मणो नार्पयेत्सुरां।
ब्राह्मणो मदिरां पीत्वा ब्राह्मण्यादेव हीयते॥

इत्यादि शक्तिसंगमतन्त्रराजादिवचनैर्निषिद्धत्वात्। इह धर्मपाशनिरसनोपायस्सम्प्रदायादेवावसेयः॥

व्यवस्थाप्रकाराश्च कौलोपनिषद्भाष्ये अस्माभिः प्रदर्शिताः। ततश्च तदधिकारिणां तादृशैरुल्लासैरन्तःकरणावच्छिन्नस्य जीवात्मनोऽन्तःकरणोपाधिकृतसंकोचापनये सति ब्रह्मभावे किमवशिष्यते। न च द्रव्योल्लासस्यागमापायित्वेन न तावतैव कृतार्थतेति वाच्यं। अस्य पर्यनुयोगस्य समाधावपि तुल्यत्वात्। अत तत्र पवननियमनादिभिरुपायैः पुनः पुनस्समाधिप्रवेशनेन चिराभ्यासपाटवेन कतिपयदिवसोत्तरं विनापि पवननिरोधं सार्वकालिकस्समाधिरुत्पद्यते। समुद्रे नौकामारुह्य गच्छतां तत्कल्लोलैस्सुचिरमान्दोलितवतां नौकावरोहणेऽप्यान्दोळनानुवृत्तिदर्शनात् इति चेत्तुल्यं प्राकृतेपि॥

संस्कृतद्रव्यपानजन्योन्मन्यावस्थाभ्यासपाटवेन विनापि द्रव्यं कतिपयदिवसैस्तादृशदशाया अकृत्रिमायास्सिद्धेः। अक्षरार्थस्तु पावितेन मन्त्रसंस्कारसंस्कृतेन हविषादेवीपूजाशेषभूतेन परिस्रुता-पीयमानेन मनस्तः-अन्तःकरणाजाज्जाते संकोचे-अमनः परिच्छेदे, पगलिते-निर्व्युत्थानं बिलीने सति उन्मन्युल्लासोत्तरानवस्थायामिचि यावत्॥ वै निश्चयेन सर्वः सर्वात्मको भवति। तेन स्वामैकविषयकनिर्विकल्पकवृत्तिजनको मद एवान्तर्यागविधायकवाक्ये धात्वर्थ इत्युपसंहृतं भवति। अनेनैवाशयेन तन्त्रे मत्तस्य बहुविधता प्रतिपाद्यते॥

रमन्ते कामुका मत्ताः मत्ताः कुप्यन्ति कोपिनः।
गायन्ति गायका मत्ताः मत्ता ध्यायन्ति योगिनः॥

इति॥ तेन योगविशेषोप्येतत्सहायत्वेनाक्षिप्तः॥

सर्वात्मकत्वमेव विवृणोति्। सर्वस्य जगतो विधाता ब्रह्मा। भर्ता विष्णुः हर्ता रुद्रश्च स एव किं बहुना दासदाशकितवादिप्राणिमात्ररूपस्स एव। भवति इत्याह विश्वरूपत्वमेति इति॥ शरीरपातस्तु प्रारब्धवशाद्यदाकदापि यत्र क्वापि भवतु, न तावतास्य कोऽपि विशेषः॥ कृतकृत्यत्वादिति भावः। उक्तं च कल्पसूत्रे इत्थं विदित्वा विधिवदनुष्ठितवत्रः कुलनिष्ठस्य सर्वतः कृतकृत्यता शरीरत्यागे श्वपचगृहकाश्योर्नान्तिरं स जीवन्मुक्त इति॥

इत्थं त्रैपुरसिद्धान्तं कथितमुपसंहरन्नेतदध्ययनादपि फलमस्तीत्युपदेष्टुं षोडशीं यजुरन्तामृचमाह इयं महोपनिषदिति॥

इयं महोपनिषत् त्रिपुराया यामक्षकं परमे गीर्भिरीट्टे।
एषर्ग्यजुः परमेतच्च सामेवाऽयमथर्वेयमन्या च विद्योम् ।।१६।।
इत्युपनिषत् ।।

(अध्ययनफलम्)

उपबृंहितश्चैतत् कल्पसूत्रकृता भगवता श्रीपरशुरामेण
य इमां दशमखण्डीं महोपनिषदं महात्रैपुरसिद्धान्तसर्वस्वभूता-
मधीते स सर्वेषु यज्ञेषु यष्टा भवति यं यं क्रतुमधीते तेन तेनास्येष्टं
भवतीति हि श्रूयते इत्युपनिषत् इति शिवमिति।

एतेनास्यां महोपनिषदि ये अकाथिता अपेक्षिता अर्थाः ते कल्पसूत्राद् ग्राह्याः। कल्पसूत्राधिकरणे शाखाभेदेन विप्रकीर्णानामगानामुपसंहारसमर्थान्प्रत्येव प्रयोगशास्त्रस्य प्रामाण्यसमर्थनादिति सिध्यति॥

अक्षरार्थस्तु इयं त्रिपुराया महोपनिषत् रहस्यप्रतिपादकवाक्यसन्दर्भरूपा पठनीयेति शेषः। तत्र हेतूनाह यामित्यादिना परममक्षरं ब्रह्म कर्तृ यामिमां उपनिषदं गीर्भिः स्तुतिवाग्भिः ईट्टे स्तौति ईडस्तुतावित्यस्य रूपं। परमे इति सोश्शे आदेशः। यां ब्रह्मेति पदयोर्व्यत्यासेन प्रथमाद्वितीयान्ततास्वीकारेणोपनिषत्कर्तृकब्रह्मकर्मकस्तुतिर्वा। परमेश्वरेणापि स्तुतत्वात् तत्स्तावकत्वाच्चेत्यर्थः॥ हृल्लेखाक्षरं यां क्षिपुरां स्तौतीति वा। परं, ए, इति छेदः एकाररूपमक्षरमिति वा।

यदेकादशमाधारं बीजं कोणत्रयोद्भवं।
ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते॥

इति वचनात्।

एकारेऽपि, अ, ई, इति छेदो वा।

अकारो वै सर्वा वाक् यदीँ शृणोत्यलकँ शृणोतीति श्रुतेः। चरम ओंकारो वा अक्षरे विशेष्यत्वेनान्वेति॥ सः गीर्भिः अकारोकारमकारैः परमोऽखण्डोऽपि यां स्तौतीत्यर्थः॥

समस्तं व्यस्तं वा शरणदगृणात्योमिति पदं।। इति शिवरहस्ये (शिवमहिम्नस्तवे) स्मरणात्।

स्वाध्यायेऽध्येतव्य इति विधिविहितविविधाध्ययनान्यपि ध्ययनेनैव सिध्यन्तीत्याह एषेति। ऋगादिशब्दा वेदपराः न त्वेकैकमन्त्रपराः। अथर्वादिप्रायपाठात्।। एषा एतत् अयं इति शब्दा ऋग्यजुषाथर्वणां विशेष्यत्वभिप्रायेण ।। साम्नो ध्वनिरूपत्वेनानक्षरत्वात् इवेति पदेनाक्षरेषु तत्तुल्यफलकत्वद्योतनं।। अष्टादशविद्यासु चतुर्णामुपादानात् अन्यपदेनोपवेदाद्याश्चतुर्दश गृह्यन्ते।।

सर्वस्वरूपेयमुपनिषदित्यर्थः। प्रणवस्वरूपाप्येषैवेत्याह ओमिति।। ओमाङोश्चेति पररूपं तेन यतिभिरप्यध्येतव्येति भावः ।। इयमुपनिषदेतादृशीत्येवं यो ह्येतस्या महिमानं वेद तस्य महिमानं साक्षात् श्रुतिरपि वक्तुमसमर्था तस्य ब्रह्मैकरूपत्वात् तत्र वाचामप्रवृत्तेरित्याशयेन श्रुत्या मौनमास्थितं इत्युपनिषदिति।। इतोऽधिकस्य रहस्यस्य वक्तव्यांशस्याभावादिति भावः।। इति श्रीः ।।

इति भास्कररायेणाग्निचिता त्रिपुरामहोपनिषदोऽर्थाः।
प्रकटयितुमयोग्या अपि विदुषां तोषाय कतिपये कथिताः ।।
इति श्रीमद्भास्कररायमहाशयरचित त्रिपुरोपनिषद् भाष्यं सम्पूर्णम्।।

Vidyālankāra, Śāstra-Chūḍāmaṇi, Sangīta-Kalāratna, Professor Sāligrama Krishna Ramachandra Rao is a well-known scholar who combines traditional learning with modern research. Well versed in Sanskrit, Pāli, Ardhamāgadhi and several modern Indian languages and acquainted with Tibetan and some European languages, he has written extensively on Vedānta, Buddhism, Jainism, Indian Culture, Art and Literature.

In his professional career, however, he was a Professor of Psychology. He has headed the Department of Clinical Psychology in the National Institute of Mental Health and Neuroscience's, Bangalore, and the Department of Indian Culture in the Collision College Study Center of the University of the Pacific (U.S.A). At present, he is the Senior Associate of National Institute of Advanced Studies (Indian Institute of Science), Bangalore, and Guest Faculty, Indian Institute of Management, Bangalore and member of the Governing Council of TTD (SVCL Research Centre), Tirupati.

He has been Member of Karnataka State Lalitha Kala Academy and Sangita Nritya Academy; he has served on the Āgama Board (Govt. of Karnataka). He is President of Śilpa-Kalā Pratishṭāna. The Govt. of Karnataka has honoured him with the 1986 Rajyotsava Award. He has received awards from Lalita-Kala Academi and Sangita Nritya Academi. He is the recipient of the Veda Sanman for the year 2000 by the Govt. of India (H.R.D. Ministry).

Kendriya Samskrita Vidya-peetha, Tirupati, (deemed university) has awarded him honoris causa degree 'Vachaspati' (2003).

He has written more than sixty books in Kannada, a play in Sanskrit, and a Pāli commentary on a Buddhist classic. One of his books on Iconography in Kannada has won the State Sahitya Academi Award, as also another of his books on the Tirupati Temple.

Among his numerous English Publications are three volumes of **Encyclopaedia of Indian Medicine** (Popular Prakashan, Mumbai), **Tibetan Tantrik Tradition** and **Tibetan Meditation** (Arnold Heinemann, Delhi), **Consciousness in Advaita**, and a series of six books on **Indian Temples** (IBH Prakashana, Bangalore) and **Origins of Indian Thought** (Bangalore University); **Kalpatharu Research Academy** has published his **Pratimā-Kosha** in six volumes. **Āgama-Kosha** in Twelve volumes, **Art and Architecture of Indian Temples** in three volumes.

He is at present engaged in the 30-volume project Ṛgveda-Darśana (thirteen volumes of which have appeared).

He is also musicologist, sculptor and painter, and has held some one man shows.

OMKAR OFFSET PRINTERS
Bangalore-560 002. Ph: 26708186
e-mail: omkar@blr.vsnl.net.in
www.omkarprinters.com

KALPATHARU RESEARCH ACADEMY
(A DIVISION OF SRI SRINGERI SHARADA PEETHAM)
BANGALORE

The Kalpatharu Research Academy, Bangalore is an Institution running with the benign blessings of His Holiness Jagadguru Shankaracharya, Sri Sri Sri Bharathi Teertha Mahaswamiji under the auspicious of Dakshinamnaya Sri Sringeri Sharada Peetham, established in 1981. Kalpatharu Research Academy has strided across the horizon of Indological Research and Publications with giant steps, and today stands as an Institution known for its unique quality of Research work.

Kalpatharu Research Academy is dedicated to the cause of preservation of ancient heritage of India; it has encouraged Research in the fields of *Agama, Veda, Tantra, Jyoutisha, Mantra-Sastra, Vastu, Yoga, Silpa, Ayurveda* etc.

Among its prestigious publications (numbering more than Hundred till now), are Six Volumes of **Pratima-Kosha,** Twelve Volumes of **Agama-Kosha**, Three Volumes of the **Art and Architecture of Indian Temples, Vastu-Shilpa-Kosha** in Three Volumes, **Devata-rupa-mala** in four volumes and several Koshas like **Ganesha-Kosha, Lalita-Kosha** and **Navagraha-Kosha, Oshadhi-Kosha, Salagrama-Kosha, Gita-Kosha, Hanumat-Kosha, Vanaspathi Kosha** etc.

The Academy has plans of undertaking intensive Research in the field of *Veda* and *Vedanga,* and intends publishing **"Bharatiya-Samskriti-Sarvasva-Kosha"** an encyclopaedic work in several volumes dealing with all aspects of Indian Tradition and Culture. It seeks to promote Education, Culture, Science, Art and learning in all its branches. The approach will be broad-based and multi-disciplinary.

An extensive, comprehensive and specialist reference library has been built up to assist the Research Workers in the Indological disciplines. A valuable collection of *Palm-Leaf* manuscripts relating to *Veda, Vedanta, Vedanga* and allied subjects has already been made; the collection work is continuing.

Dakshinamnaya Sri Sringeri Sharada Peetham has been running a *Guru-Kula* type of Institution on traditional lines to impart Vedic Education at several places. Some of these Institutions are over 100 years old. It is the intention of Kalpatharu Research Academy to take an active part in continuing this age-old tradition and act as the Research & Publication wing for these Institutions.

Our ambition is to develop as a National Centre for higher learning in *Veda, Vedanga* and *Shastras* and facilitate the propagation of unique *Sanskrit* and Vedic Texts in the National and International arena.

This Publication is the **108th (One hundred and Eighth)** of its achievement in this field.

Date : 24th April 2004
Sringeri

V.R. Gowrishankar, B.E., D.I.I.Sc., AMIMA
Chairman